CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

कुमारसम्भवम्

सान्वय 'सुधा-संस्कृत-हिन्दीव्याख्योपेतम्

व्याख्याकार:

पं० परमेश्वरदीन पाण्डेयः

111

कृष्णदास अकादमी, वाराणसी

Sri Vidyabharati Book Centre, Singeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

कृष्णदास संस्कृत सीरीज

६७

महाकविकालिदासविरचितं

कुमारसम्भवम्

'सुधा'-संस्कृत-हिन्दीव्याख्योपेतम्

व्याख्याकारः

पं० परमेश्वरदीन पाण्डेयः

एम० ए० (संस्कृत-हिन्दी), साहित्याचार्यः, साहित्यरत्नम्

(सर्गः ३)

A. SUBRAHMANYA SHASTRY
Photo and Book seller,
Bharathi Street,
SRINGERI - KADUR

कृष्णदास अकादमी, वाराणसी-२२१००१

Sri Vidyabharathi Book Centre, Sringeri

१९८५

प्रकाशक : कृष्णदास अकादमी, वाराणसी
CC-O. In Public Domain. Digitized by eGangotri
मुद्रक : चौखम्बा प्रेस, वाराणसी

संस्करण : प्रथम, वि० सं० २०४२

मूल्य रू०: ३-००

© KRISHNADAS ACADEMY

Oriental Publishers and Distributors

Post Box No. 1118

Chowk,(Chitra Cinema Building), Varanasi-221001

(INDIA)

अपरं च प्राप्तिस्थानम्

चौखम्बा संस्कृत सीरीज आफिस

के० ३७/९९, गोपाल मन्दिर लेन

पो० बा० १००८, वाराणसी-२२१००१ (भारत)

फोन : ६३१४५

Sri Vidyabhavan Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कथासार

(समीक्षात्मक 'प्रस्तावना' प्रथम सर्ग में पढ़िए)

इस तृतीय सर्ग में कामदेव देव-राज इन्द्र की प्रसन्नता के लिए ऋतुराज वसन्त की सहायता से भगवान् शंकर की समाधि को भी अपने काम-बाण से तोड़ने की बात कहता है। यह सुनकर देवराज इन्द्र समाधिस्थ शंकर के मन में शैलपुत्री कुँआरीं पार्वती के प्रति काम-वासना जागृत करने को कहते हैं। इन्द्र की आज्ञा पाते ही कामदेव समाधिस्थ भगवान् शंकर के निकट पहुँच जाता है और अपने मित्र वसन्त ऋतु का आह्वान करके वहाँ कामोत्तेजक अतिरमणीय सृष्टि उत्पन्न कर देता है—मन्द-सुगन्ध वायु बहने लगती है, कोकिल-कूजन के साथ-साथ सभी पक्षिगण सुमधुर गान करने लगते हैं। जड़-चेतन सभी में कामवासना जागृत हो उठती है। इसी समय शैलकुमारी पार्वती अपनी सखी-सहेलियों के साथ शिव-समाधि की अर्चा के लिए पहुँच कर ज्यों ही शिवजी को माला पहनाती हैं कि शिव की समाधि टूट जाती है और पार्वती के मुख-सौन्दर्य को देखकर उन्हें काम-विकार उत्पन्न हो जाता है। इस विकार का उत्पादक कौन है, यह सोचकर शिवजी चारों ओर दृष्टि फैलाते हैं तो देखते है कि पार्वती के ओट में खड़ा होकर कामदेव उनके ऊपर अपने कामबाण (पुष्प-बाण) को छोड़ने का प्रयास कर रहा है। यह देखते ही भगवान् शंकर अतिक्रुद्ध होकर रुद्ररूप धारण कर लेते हैं और उनके ललाटस्थ तृतीय नेत्र से अग्निज्वाला भभक उठती है जिससे तत्क्षण कामदेव भस्मसात् हो जाता है, देवगण हा-हा-कार करने लगते हैं तथा शैला-धिराज हिमालय भी इस घटना से सशंकित होकर अपनी पुत्री पार्वती को अपने घर ले जाते हैं। इस काण्ड से शिव-पार्वती परिणय का प्रयास विफल हो जाता है।

Digitized by Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

कुमारसम्भवम्

सान्वय 'सुधा' संस्कृत-हिन्दीव्याख्योपेतम्

तृतीयः सर्गः

तस्मिन्मघोनस्त्रिदशान्विहाय, सहस्रमक्ष्णां युगपत्पपात ।
प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु ॥ १ ॥

अन्वयः—मघोनः अक्ष्णां सहस्रम् त्रिदशान् विहाय तस्मिन् युगपत् पपात । प्रायः प्रभूणाम् आश्रितेषु गौरवं प्रयोजनापेक्षितया चलं भवति ।

व्याख्या—तस्मिन्निति । मघोनः=शक्रस्य । अक्ष्णां=चक्षुषाम् । सहस्रम् = दशशतम् । त्रिदशान् = देवान् । विहाय = परित्यज्य । तस्मिन्=कामे । युगपत्= एकवारमेव । पपात=अपतत् । प्रायः=बाहुल्येन । प्रभूणां=स्वामिनाम् । आश्रितेषु=सेवकेषु विषये । गौरवं=समादरः । प्रयोजनापेक्षितया—प्रयोजनमपेक्षते तच्छीलः प्रयोजनापेक्षी तस्य भावः प्रयोजनापेक्षिता, तया=कार्यार्थित्वेन । चलं= चपलम् । भवति ।

सरलार्थः—तारकासुरवधानन्तरमिन्द्रः सर्वान् देवान् परित्यज्य स्वसहस्रनेत्रैः कामदेवमेकदैवापश्यत् । प्रायेण स्वामिनः सेवकेषु विषये कार्यार्थित्वेन चञ्चलाः भवन्ति ।

हिन्दी—तारकासुर के संहार के पश्चात् देवराज इन्द्र ने देवताओं की ओर से अपने सहस्रनयनों को हटाकर एक साथ कामदेव पर ही अपनी दृष्टि डाली । प्रायः स्वामी अपने आश्रित सेवकों के सम्बन्ध में उन-उन कार्यों को करने वालों पर अस्थिर रहा करता है ॥ १ ॥

स वासवेनासनसन्निकृष्टमितो निषीदेति विसृष्टभूमिः ।
भर्तुः प्रसादं प्रणिधाय सद्यः कृतं प्रियः प्रक्रमतैवमेनम् ॥ २ ॥

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—सः वासवेन आसनसन्निकृष्टम् इतः निषीद इति विसृष्टभूमिः सन् भर्तुः प्रसादं मूर्ध्ना प्रणिनन्द्य मिथः एनम् एवम् वक्तुं प्राक्रमत ।

व्याख्या—स वासवेनेति । सः=मदनः । वासवेन=शक्रेण ('वासवो वृत्रहा वृषा' इत्यमरः) । आसनसन्निकृष्टम् = आसनसन्निकटम् । इतः=अत्र । निषीद=उपविश । इति=एवम् । विसृष्टभूमिः सन्=विसृष्टा भूमिर्यस्मै सः=दत्तस्थानः सन् । भर्तुः=स्वामिनः । प्रसादम्=अनुकम्पाम् । मूर्ध्ना=शिरसा ('उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः) । प्रतिनन्द्य = सम्मान्य । मिथः=अन्योन्यम् । एनम्=अमुम् इन्द्रम् । एवम्=इत्थम् । वक्तुम्=कथयितुम् प्राक्रमत=प्रारभत ।

सरलार्थः अत्र मम पार्श्वमुपविश इति शक्रेण कृतसङ्केतः स मदनः स्वामिनोऽनुग्रहमभिनन्द्यतं रहस्येवं भणितुमारभत ।

हिन्दी—कामदेव इन्द्र के द्वारा 'आसन के समीप यहाँ बैठ जाओ' ऐसा कहकर अपने समीप ही बिठलाते हुए स्वामी के आदेश का स्वागत कर इस प्रकार आपस में कहना प्रारम्भ किया ॥ २ ॥

अथाष्टाभिः श्लोकैः कामस्य प्रतिपादनम्—

आज्ञापय ज्ञातविशेष ! पुंसां लोकेषु यत्ते करणीयमस्ति ।
अनुग्रहं संस्मरणप्रवृत्तमिच्छामि संवर्द्धितमाज्ञया ते ॥ ३ ॥

अन्वयः—हे पुंसां ज्ञातविशेष ! लोकेषु यत् ते करणीयम् अस्ति, आज्ञापय । संस्मरणप्रवृत्तं ते अनुग्रहम् आज्ञया सम्बर्द्धितम् इच्छामि ।

व्याख्या—आज्ञापयेति । हे पुंसां=नराणाम् । ज्ञातविशेष-ज्ञातः विशेषः येन सः, तत्संबुद्धौ=ज्ञातसार ! ('स्युः पुमांसः पञ्चजनाः पुरुषः पूरुषः नरः।' इत्यमरः) । लोकेषु=त्रिभुवनेषु । यत् ते=तव । करणीयं=कर्तव्यम् । अस्ति = भवति । तत् आज्ञापय=आदेशय । संस्मरण-प्रवृत्तं—सम्यक् स्मरणं संस्मरणं, तेन प्रवृत्तस्तम्=सम्यक्स्मृतिजातम् । ते=तव । अनुग्रहं=कृपाम् । आज्ञया=अनुज्ञया । सम्बर्द्धितं=समेधितम् । इच्छामि=अभिलषामि । उपजातिवृत्तम् ।

सरलार्थः—हे नरज्ञातसार ! स्वामिन् ! त्रिभुवनेषु तव यत्कृत्यमस्ति तदादेशय ! सर्वलोकाधिपतेस्तव यत्प्रसादः संस्मरणेन मयि अङ्कुरितः, तमहं संवर्द्धितमभिलषामि ।

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—हे पुरुषों की सामर्थ्य को जानने वाले स्वामिन्! संसार में जो कुछ आपका कार्य हो उसे करने की आज्ञा दीजिए। भली प्रकार स्मरण से उत्पन्न हुआ आपका अनुग्रह, आज्ञा से प्रवर्द्धित (पल्लवित) करना चाहता हूँ ॥ ३ ॥

केनाऽभ्यसूया पदकाङ्क्षिणा ते नितान्तदीर्घैर्जनिता तपोभिः।
यावद्भवत्याहितसायकस्य मत्कार्मुकस्यास्य निदेशवर्त्ती ॥४॥

अन्वयः—ते पदकाङ्क्षिणा केन नितान्तदीर्घैः तपोभिः अभ्यसूया जनिता। आहितसायकस्य अस्य मत्कार्मुकस्य निदेशवर्ती यावत् भवति ॥४॥

व्याख्या—केनाभ्यसूयेति। ते=भवतः। पदकाङ्क्षिणा=ऐन्द्रपदाभिलाषिणा। केन=केन जनेन। नितान्तदीर्घैः—नितान्त=महत् यथा स्यात् तथा दीर्घाणि नितान्तदीर्घाणि तैः=अतिप्रभूतैः। तपोभिः=तपश्चरणैः। अभ्यसूया=ईर्ष्या जनिता=कृता। आहितसायकस्य—आहितः=संहितः सायकः=शरः यस्मिन्, तस्य। अस्य=एतस्य। मत्कार्मुकस्य=मम धनुषः ('धनुश्चापौ धन्वशरासन-दण्डकार्मुकम्।' इत्यमरः)। निदेशवर्ती=आदेशवशः। यावत्=यावत्कालम् भवति=भविष्यति।

सरलार्थः—घोरतपश्चरणेन शक्रत्वपदाभिलाषिणा केन पुरुषेण भवतः ईर्ष्या कृता? असौ पुरुषः आहितशरस्य मम धनुषः द्रुतमादेशवशो भविष्यति।

हिन्दी—हे स्वामिन्! घोर तपस्या के द्वारा इन्द्रत्व पद चाहने वाले उस व्यक्ति ने आपसे ईर्ष्या की है, शीघ्र बतलाइये। वह व्यक्ति हमारे धनुष-बाण की आज्ञा का वशवर्ती हो जायेगा ॥ ४ ॥

असंमतः कस्तव मुक्तिमार्गं पुनर्भवक्लेशभयात्प्रपन्नः।
बद्धश्चिरं तिष्ठतु सुन्दरीणामारेचितभ्रूचतुरैः कटाक्षैः ॥ ५ ॥

अन्वयः—तव असम्मतः कः पुनर्भवक्लेशभयात् मुक्तिमार्गं प्रपन्नः। रेचितभ्रूचतुरैः सुन्दरीणाम् कटाक्षैः बद्धः सन् चिरं तिष्ठतु।

व्याख्या—असम्मत इति। तव=भवतः। असम्मतः=अनभीष्टः। कः=जनः। पुनर्भवक्लेशभयात्—पुनर्भवनं पुनर्भवः=पुनरुत्पत्तिः, तस्मिन् ये क्लेशाः=जन्ममरणादिदुःखानि, तेभ्यो यद्भयं तस्मात्=जन्ममरणभीतेः।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मुक्तिमार्ग=मोक्षपथः। प्रपन्नः=सम्प्राप्तः (तं वद) (सः) आरोचित
चतुरैः=आरोचिताश्च ताः भ्रुवः आरोचितभ्रुवः, ताभिश्चतुराः आरोचित
चतुरास्तैः=नर्तितभ्रूरुचिरैः। सुन्दरीणाम्=कामिनीनां कटाक्षैः=अपाङ्ग
लोकनैः। बद्धः=बन्धनं प्रापितः सन् चिरं=बहुकालपर्यन्तम्। तिष्ठतु
स्थितिं करोतु।

सरलार्थः—भवतः सम्मतिं विनैव कः पुरुषः सांसारिकजन्ममरणभी
भयात् मोक्षत्वं प्राप्तः? यतः सः भवत्कृपापर्यन्तं कामिनीनां कटाक्षैः वशीभू
सन् बहुकालं यावत् तिष्ठतु।

हिन्दी—हे स्वामिन्! आपकी सम्मति के बिना ही कौन व्यक्ति सांसा
जन्म-मरण की पीड़ा के भय से मुक्त हो पाया है? बतलाइये। क्योंकि
आपकी कृपापर्यन्त सर्वाङ्गसुन्दरियों के कटाक्षों का वशीभूत होकर चिरक
तक बन्धन में पड़ा रहे॥ ५॥

अध्यापितस्योशनसाऽपि नीतिं प्रयुक्तरागप्रणिधिर्द्विषस्ते।
कस्यार्थधर्मौ वद पीडयामि सिन्धोस्तटावोघ इव प्रवृद्धः॥ ६

अन्वयः—उशनसा नीतिम् अध्यापितस्य अपि ते द्विषः कस्य अर्थध
प्रयुक्तरागप्रणिधिः अहं प्रवृद्धः ओघः सिन्धोः तटौ इव पीडयामि वद।

व्याख्या—अध्यापितस्येति। उशनसा=दैत्यगुरुणा शुक्रेण ('शुक्रो दैत्यग
काव्य उशना भार्गवः कविः' इत्यमरः)। नीतिं=नयशास्त्रम्। अध्यापितस्य=प
तस्य अपि। ते=तव शक्रस्य। द्विषः=शत्रोः ('द्विड्विपक्षाऽहितामित्रदस्युशा
शत्रवः' इत्यमरः)। कस्य=कस्य जनस्य। अर्थधर्मौ=वर्गचतुष्टयस्य द्वौ। प्र
रागप्रणिधिः—राग एव प्रणिधिः रागप्रणिधिः, प्रयुक्तः रागप्रणिधिः येन सः प्र
रागप्रणिधिः=प्रेषितविषयाभिलाषदूतः। अहम्=मदनः। प्रवृद्धः=वृद्धिं ग
ओघः=प्रवाहः। सिन्धोः=सरितः ('देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति
याम्।' इत्यमरः)। तटौ=रोधसी। इव=यथा। पीडयामि=पीडितं करो
वद=कथय।

सरलार्थः—शुक्राचार्येण नीतिशास्त्रं पाठितस्यापि तव शत्रोः कस्य ज
धर्मौ पीडितं करोमि अहं प्रवृद्धप्रवाहः नद्यास्तटौ
पीडयामि भण।

CC-O. Jangamwadi Math Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—शुक्राचार्य के द्वारा नीतिशास्त्र पढ़ाये हुए आपके किस शत्रु के अर्थ तथा धर्म पुरुषार्थों को वर्षाकाल में बढ़े हुए प्रवाहवाले नदी-तटों के समान भेजा हुआ विषयाभिलाषी दूत मैं पीड़ित कर डालूं, कहिए ॥ ६ ॥

कामेकपत्नीव्रतदुःखशीलां लोलं मनश्चारुतया प्रविष्टाम् ।
नितम्बिनीमिच्छसि मुक्तलज्जां कण्ठे स्वयंग्राहनिषक्तबाहुम् ॥७॥

अन्वयः—एकपत्नीव्रतदुःखशीलां चारुतया लोलं मनः प्रविष्टां कां नितम्बिनीं मुक्तलज्जां सतीं कण्ठे स्वयंग्राहनिषक्तबाहुम् इच्छसि ।

व्याख्या—कामेति । एकपत्नीव्रतदुःखशीलां-एकः पतिर्यस्याः सा, एकपत्नी तस्याः व्रतम्=अन्यपुरुषादर्शनव्रतम्, दुःखं शीलं यस्याः सा दुःखशीला, एकपत्नी-व्रतेन दुःखशीला, ताम्=पातिव्रत्यदुःखस्वभावाम् ('पीडा बाधा व्यथा दुखम् ।' इत्यमरः) । चारुतया=सौन्दर्येण । ('सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।' इत्यमरः) । लोलं=चपलम् । मनः=चेतः । ('चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ।' इत्यमरः) । प्रविष्टां=कृतप्रवेशाम् । कां नितम्बिनीं=कां वरारोहाम् ('पश्चान्नितम्बः स्त्रीकट्याः' इत्यमरः) । मुक्तलज्जां-मुक्ता=त्यक्ता लज्जा=त्रपा यया सा, ताम्=निस्त्रपाम् । सतीं । कण्ठे=गले । स्वयंग्राह-निषक्तबाहुं-स्वयं गृह्णातीति स्वयंग्राहा, निषक्तौ बाहू यस्याः सा निषक्तबाहुः स्वयं ग्राहा चासौ निषक्तबाहुस्ताम्=आत्मग्राहधृतभुजाम् । इच्छसि=अभिलषसि ।

सरलार्थः—हे सुरराज ! पातिव्रतधर्मात्क्रूरस्वभावां सौन्दर्येण च चञ्चल-चित्तां कां वरारोहां स्त्रीं मद्बाणविद्धां परित्यक्तव्रीडां सतीं स्वयमेव कृतालिंगनां चिकीर्षसि ।

हिन्दी—हे देवेन्द्रों ! पातिव्रतधर्मके कारण क्रूर स्वभाववाली तथा लावण्यता से चञ्चलचित्तवाली किस रमणी को मेरे बाणों से आहत होकर लज्जा त्याग कर स्वय अपने गले में बाहें डालने वाली बनाना चाहते हो ? ॥ ७ ॥

कयासि कामिन् ! सुरतापराधात्पादानतः कोपनयावधूतः ।
तस्याः करिष्यामि दृढानुतापं प्रवालशय्याशरणं शरीरम् ॥८॥

अन्वयः—हे कामिन् ! सुरतापराधात् पादानतः (सन्) कोपनया कया अवधूतः असि, तस्याः शरीरं दृढानुतापं प्रवालशय्याशरणं करिष्यामि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—कयेति। हे कामिन्=हे कामुक! सुरतापराधात्-सुरतस्य अप राधः सुरतापराधः, तस्मात्=मैथुनापराधात् ('मैथुनं निधुवनं रतम्' इत्यमरः) पादानतः—पादयोः=चरणयोः आनतः=अवनतः सन्'। ('पादः पदङ्घ्रिश्च रणोऽस्त्रियाम्' इत्यमरः)। कोपनया=क्रोधाविष्टया। कया सुन्दर्या अवधूतः निराकृतः असि। तस्याः=तत्सुन्दर्याः। शरीरं=विग्रहम् ('गात्रं वपुः संहनः शरीर वर्ष्म विग्रहः' इत्यमरः)। दृढानुतापं-दृढः अनुतापो यस्मिंस्तत् दृढानुतापं गाढपश्चात्तापम्। प्रवालशय्याशरणं-प्रवालानां शय्या प्रवालशय्या, सैव शर यस्य तत्=पल्लवशय्याधीनम्। ('शरणं गृहरक्षित्रोः' इत्यमरः)। करिष्यामि विधास्यामि।

सरलार्थः—हे कामुक! सुरतापराधाच्चरणावनतः सन् कोपाविष्टया कया सुन्दर्या तिरस्कृतः असि? तस्याः देहं दृढपश्चात्ताप पल्लवशयनीयरक्षक विधास्यामीति।

हिन्दी—हे कामुक! सुरत के अपराध से पावों पड़ते हुए भी क्रोधयुक्त किस सुन्दरी के द्वारा आप तिरस्कृत किये गये हैं? उस सुन्दरी के शरीर क कामज्वरपीड़ा से पल्लवों की शय्या पर पड़ा रहने वाला बना दूँगा ॥८॥

प्रसीद विश्राम्यतु वीर! वज्रं शरैर्मदीयैः कतमः सुरारिः।
बिभेतु मोघीकृतबाहुवीर्यः स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥९॥

अन्वयः—हे वीर! प्रसीद। वज्रं विश्राम्यतु। मदीयैः शरैः मोघीकृत बाहुवीर्यः कतमः सुरारिः कोपस्फुरिताधराभ्यः स्त्रीभ्यः अपि बिभेतु॥ ९॥

व्याख्या—प्रसीदेति। हे वीर=हे बलशालिन्। प्रसीद=प्रसन्नो भव। वज्रं= कुलिशम्। विश्राम्यतु=विरमतु ('ह्रादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः' इत्यमरः)। मदीयैः मत्सम्बन्धिभिः। शरैः=सायकैः। मोघीकृतबाहुवीर्यः—अमोघं मोघं यथा सम्पद्यते तथा मोघीकृतं, मोघीकृतं बाहुवीर्यं यस्य सः=मोघीकृतबाहु वीर्यः=विफलीकृतभुजपराक्रमः। कतमः=कश्चन। सुरारिः=सुराणामरिः सुरारिः=देवरिपुः। कोपस्फुरिताधराभ्यः—कोपेन=क्रुधा स्फुरिता अधराः यासां ताभ्यः=रोषस्फुरितौष्ठाभ्यः। स्त्रीभ्यः=नारीभ्यः अपि ('ओष्ठाऽधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः। 'कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधौ स्त्रियाम्' इत्यमरः)। बिभेतु=भयं करोतु।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—प्रभो ! मयि दयां कुरु। तव कुलिशं परिश्रमापनोदाय किञ्चित्कालं विश्रान्तिमेतु। मदीयैः शरैः व्यर्थीकृतभुजबलः ईदृशः कतमो दैत्यः यः रोषस्फुरितौष्ठाभ्यः सुन्दरीभ्यः भयं करोतु।

हिन्दी—हे प्रभो ! मुझ पर दया कीजिए। तुम्हारा वज्र परिश्रम दूर करने के लिए कुछ समय विश्राम करे। ऐसा कौन दैत्य है जो मेरे बाणों से निष्फल किये गये बाहुबल वाले क्रोध से फड़कती हुई ओठोंवाली सुन्दरियों से भयभीत हो जाय ॥९॥

तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥१०॥

अन्वयः तव प्रसादात् कुसुमायुधः अपि (अहम्) एकं मधुम् एव सहायं लब्ध्वा पिनाकपाणेः हरस्य अपि धैर्यच्युतिं कुर्याम्, अन्ये धन्विनः मम के ?

व्याख्या—तवेति। तव=ते। प्रसादात्=कृपायाः। कुसुमायुधः=कुसुमान्यायुधं यस्य सः कुसुमायुधः=मदनः ('आयुधं तु प्रहरणं शस्त्रमस्त्रम्' इत्यमरः)। अपि अहम्। एकम्=केवलम्। मधुं=वसन्तमेव। सहायं=सहायकम्। लब्ध्वा=प्राप्य। पिनाकपाणेः— पिनाकं=धनुः पाणौ=हस्ते यस्य तस्य, हरस्य=शिवस्यापि। धैर्यच्युतिं=धैर्यस्खलनम्। कुर्याम्=विदधेम्। अन्ये=अपरे। धन्विनः=धनुर्धारिणः। मम=मे। के=न केऽपि सन्ति इत्यर्थः। विभावनाऽलङ्कारः। उपजातिवृत्तम्।

सरलार्थः—भवतः प्रसादात् कामोऽप्यहं केवलं वसन्तं सहायकं कृत्वा धनुर्धारिणः शिवस्य अपि धरिताहानिं कुर्याम्। अपरे धनुर्धारिणः केऽपि मत्समक्षं स्थातुं न शक्नुवन्ति।

हिन्दी—(हे प्रभो !) आपकी कृपा से कुसुमायुध होकर भी मैं केवल वसन्त को अपना सहायक बनाकर पिनाकपाणि शिव के धैर्य को भी नष्ट कर सकता हूँ अन्य कोई धनुर्धारी मेरे समक्ष नहीं ठहर सकता है ॥१०॥

अथोरुदेशादवतार्य पादमाक्रान्तिसम्भावितपादपीठम्।
सङ्कल्पितार्थे विवृतात्मशक्तिमाखण्डलः काममिदं बभाषे ॥११॥

अन्वयः—अथ आखण्डलः ऊरुदेशात् पादम् आक्रान्तिसम्भावितपादपीठं (यथा स्यात् तथा) अवतार्य सङ्कल्पितार्थे विवृतात्मशक्तिं कामम् इदं बभाषे।

Sri Vidyabharati Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या--अथेति । अथ=अनन्तरम् । आखण्डलः सहस्राक्षः ('आखण्डलः सहस्राक्षः ऋभुक्षः' इत्यमरः) । ऊरुदेशात्—ऊरोः देशः ऊरुदेशस्तस्मात्=ऊरुभागात् ('शक्थिवलीबे पुमानूरुः' इत्यमरः) । पादम्=चरणम् । आक्रान्तिसम्भावितपादपीठम्— आक्रान्त्या=आक्रमणेन सम्भावितं=सफलीकृतं पादपीठं=चरणपीठं यस्मिन् तद्यथा स्यात्तथा । अवतार्य=अवतारणं विधायः । सङ्कल्पितार्थे--संकल्पः सञ्जातः यस्य सः संकल्पितः संकल्पितश्चासौ अर्थ इति संकल्पितार्थस्तस्मिन्=प्रतिज्ञातविषये । विवृतात्मशक्तिम्--आत्मनः शक्तिः आत्मशक्तिः, विवृत्ता आत्मशक्तिर्येन सः विवृतात्मशक्तिस्तं = प्रकटीकृतस्वबलम् । कामं=मदनम् । इदम्=एतत् । बभाषे=उक्तवान् ।

सरलार्थः--कामदेवकथनानन्तरमिन्द्रश्चरणं शक्थिदेशादवतार्य स्वपादपीठे धृत्वा हरचित्ताकर्षणरूपे पौरुषं प्रकटयन्तं काममिद जगाद ।

हिन्दी--कामदेव के इस प्रकार कहने के पश्चात् इन्द्र ने अपनी जाघों पर से पैर उतार कर पादपीठ पर रखते हुए अपने इष्टदेव शिव के चित्ताकर्षण रूप में स्वयम् अपनी शक्ति को प्रकट करने वाले कामदेव से इस प्रकार कहा ।

सर्वं सखे ! त्वय्युपपन्नमेतदुभे ममाऽस्त्रे कुलिशं भवांश्च ।
वज्रं तपोवीर्यमहत्सु कुण्ठं त्वं सर्वतोगामि च साधकं च ॥१२॥

अन्वयः सखे ! सर्वम् एतत् त्वयि उपपन्नम् । मम कुलिशं भवान् च उभे अस्त्रे । वज्रं तपोवीर्यमहत्सु कुण्ठं, त्वं सर्वतोगामि च साधकं च ।

व्याख्या—सर्वमिति । सखे=हे मित्र ! सर्वम्=सम्पूर्णम् । एतत्=इदम् त्वयि=भवति । उपपन्नम् सिद्धम् । मम=मे । कुलिशं=वज्रम् । भवान्=त्वं च उभे=द्वे । अस्त्रे=आयुधे । विद्येते । वज्रम्=कुलिशम् । तपोवीर्यमहत्सु--तपोवीर्येण महान्तस्तेषु=तपोबलप्रबलेषु । कुण्ठं=मन्दम् (कुण्ठो मन्दः क्रियासु यः इत्यमरः) । त्वम्=भवान् । सर्वतोगामि=सर्वत्र गमनशक्तः च । साधकं=कार्यसम्पादकश्च । अत्र पदद्वयमस्त्रविषयत्वेन प्रयुक्तमतः तस्य नपुंसकलिङ्गता जाता ।

सरलार्थः—हे मित्र ! मम वज्रं त्वञ्च द्वे एव मे आयुधे स्तः । तयोः वज्रं तु तपोबलेन प्रबलशत्रोः विषये व्यर्थं भवति किञ्च त्वं सर्वत्र गमनशक्तः सर्वकार्यसाधकश्चासि ।

CC-O. Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी - हे मित्र कामदेव ! मेरा वज्र और तुम दो ही मेरे आयुध हो। इनमें हमारा आयुध तो तपोबल से प्रबल शत्रु के सम्बन्ध में मन्द पड़ जाता है परन्तु तुम सर्वत्र गमनशील तथा कार्यसम्पादक हो ॥१२॥

अवैमि ते सारमतः खलु त्वां कार्ये गुरुण्यात्मसमं नियोक्ष्ये ।
व्यादिश्यते भूधरतामवेक्ष्य कृष्णेन देहोद्वहनाय शेषः ॥१३॥

अन्वयः—(हे सखे !) ते सारम् अवैमि । (अतः) खलु आत्मसम त्वां गुरुणि कार्ये नियोक्ष्ये । कृष्णेन भूधरताम् अवेक्ष्य शेषः देहोद्वहनाय व्यादिश्यते ।

व्याख्या—अवैमीति । ते=तव मदनस्य । सारम्=बलम् ('सारो बले स्थिरांशे च न्याये क्लीबं वरे त्रिषु' इत्यमरः) । अवैमि=जानामि । अतः खलु=किल । आत्मसमं=मम समानम् । त्वां=भवन्तम् । गुरुणि कार्ये=महति कृत्ये । नियोक्ष्ये=नियुक्तं करोमि । कृष्णेन = नारायणेन । 'विष्णुर्नारायणः कृष्णो वकुण्ठो विष्टरश्रवाः' इत्यमरः) भूधरताम्=भूमिधारणक्षमताम् । अवेक्ष्य=दृष्ट्वा । शेषः=शेषनागः । देहोद्वहनाय—देहस्य = शरीरस्योद्वहनाय=उद्वोढुम् । व्यादिश्यते=नियुज्यते । अत्र प्रतिवस्तूपमालङ्कारः । उपजातिवृत्तम् ।

सरलार्थः—हे सखे ! तव बलमहं वेद्मि । अतः त्वत्समं त्वामेवं महति कर्मणि विनियोजयामि, यथा भगवान् विष्णुः भूधारणक्षमं विज्ञाय शेषं शरीरभारोद्वोढुं न्ययोजयत् ।

हिन्दी—हे मित्र मदन ! मैं तुम्हारा बल जानता हूँ । अतः तुम्हारे योग्य महान् कार्य में तुम्हें लगा रहूँ, जैसे भगवान् विष्णु ने भूभार-धारणयोग्य समझकर शेषनाग को अपना शरीर-भार वहन करने में लगाया था ॥ १३ ॥

आशंसता बाणगतिं वृषाङ्के कार्यं त्वया नः प्रतिपन्नकल्पम् ।
निबोध यज्ञांशभुजामिदानीमुच्चैर्द्विषामीप्सितमेतदेव ॥१४॥

अन्वयः—वृषाङ्के बाणगतिम् आशंसता त्वया नः कार्यं प्रतिपन्नकल्पम् । इदानीम् उच्चैः द्विषां यज्ञांशभुजाम् ईप्सितम् एतद् एव निबोध ।

व्याख्या—आशंसतामिति । वृषाङ्के—वृषः अङ्के यस्य सः, तस्मिन्=शङ्करे । बाणगतिम्—बाणस्य गतिस्तम्=शरशक्तिम् । ('उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृष' इत्यमरः) । आशंसता = वर्णयता । त्वया = भवता । नः = अस्माकं सुरा-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

णाम् । कार्यं=कृत्यम् । प्रतिपन्नकल्पितम्-ईषत् असमाप्तं प्रतिपन्नं प्रतिपन्नकल्पम् ('ईषदसमाप्तौ कल्पब्यपदेश्यदेशीयरः' इति कल्पप्रत्ययः) । इदानीम्=साम्प्रतम् । ('एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा' इत्यमरः) । उच्चैःद्विषाम्=उन्नतद्विषाम् । यज्ञांशभुजाम्--यज्ञस्यांशः यज्ञांशः, तं भुञ्जंतीति यज्ञांशभुजस्तेषां यज्ञांशभुजाम्=यज्ञभागभोगिनां सुराणाम् । ईप्सितं=वांछितम् । एतत्=इदम् एव । निबोध=अवेहि ।

सरलार्थः- हे सखे सुमनायुध ! महादेवे शरशक्तिं कथयता भवताऽस्माकं कार्यं कर्त्तुमङ्गीकृतप्रायम् । सम्प्रति प्रबलशत्रूणामस्माकं सुराणामभीष्टमेतदेवावेहि ।

हिन्दी--हे मित्र कामदेव ! शिवजी के ऊपर अपनी बाणशक्ति का वर्णन करते हुए आपने हमारा कार्य करना तो प्रायः स्वीकार कर ही लिया है । अब प्रबल राक्षस शत्रुओं से पीड़ित यज्ञभाग लेनेवाले देवताओं का यही वांछित कार्य समझ लो ॥ १४ ॥

अमी हि वीर्यप्रभवं भवस्य जयाय सेनान्यमुशन्ति देवाः ।
स च त्वदेकेषुनिपातसाध्यो ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ॥१५॥

अन्वयः--हि अमी देवाः जयाय भवस्य वीर्यप्रभवं सेनान्यम् उशन्ति । ब्रह्माङ्गभूः ब्रह्मणि योजितात्मा स च त्वदेकेषुनिपातसाध्यः अस्ति ।

व्याख्या-अमीति । हि=यतः । अमी=एते । देवाः=सुराः । ('अमराः निर्जरा देवास्त्रिदशा विबुधाः सुराः' इत्यमरः) । जयाय=विजयार्थम् । भवस्य=शिवस्य । वीर्यप्रभवम्--वीर्येण प्रभवः वीर्यप्रभवस्तम्=तेजःसमुत्पन्नम् । सेनान्यम्=सेनाधिपम् । उशन्ति=कामयन्ते । ब्रह्माङ्गभूः=ब्रह्माङ्गानां भूः ब्रह्माङ्गभूः=सकलजगन्निर्माणकर्तृतनयः । ब्रह्मणि=परमात्मनि । योजितात्मा=योजितः=संलग्नः आत्मा=जीवः येन सः नियमितचेतः । सः=असौ शिवः च । त्वदेकेषु-निपातसाध्यः--एकश्चासौ इषुः एकेषुः तस्य निपातेन यः साध्यः सः=भवतः एकशरसम्पातसाध्यः अस्तीति ।

सरलार्थः—यतः इमे देवाः विजयार्थं शिवस्य वीर्येण उत्पन्नं सेनापतिं कामयन्ते । सद्योजातादिहृदयादिमंत्रस्थानं परमात्मनि नियोजितचित्तवृत्तिः असौ शिवः तव एकशरसंपातसाध्यः अस्तीति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी--क्योंकि ये देवता (उस तारकासुर पर) विजय पाने के लिए शिवजी के वीर्य से उत्पन्न सेनापति को चाहते हैं अब मन्त्रन्यासपूर्वक ध्यानमग्न भगवान् शिव का मनोविकार तुम्हारे एक ही बाण-निपात से हो सकता है ।१५।

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने रोचयितुं यतस्व ।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ॥१६॥

अन्वयः—यतात्मने तस्मै प्रयतां हिमाद्रेः तनूजां रोचयितुं यतस्व । योषित्सु तद्वीर्यनिषेकभूमिः सा एव क्षमा, इति आत्मभुवा उपदिष्टम् ।

व्याख्या—तस्मै इति । यतात्मने—यतः = नियतः आत्मा = जीवः येन सः, तस्मै=नियतचेतसे । तस्मै=शिवाय । प्रयतां=शुद्धाम् । हिमाद्रेः=हिमवतः । तनूजाम् = दुहितरं पार्वतीम् । रोचयितुं = प्रसादयितुम् । यतस्व = प्रयत्नं कुरु । योषित्सु=नारीषु मध्ये । तद्वीर्यनिषेकभूमिः—तस्य वीर्यं तद्वीर्यं, तस्य निषेकभूमिरिति तद्वीर्यनिषेकभूमिः=शिववीर्यक्षरणक्षेत्रम् । सा=पार्वती एव । क्षमा = समर्था । इति=इदम् । आत्मभुवा=ब्रह्मणा ('ब्रह्माऽऽत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः' इत्यमरः) । उपदिष्टम्=कथितम् ।

सरलार्थः—विषयविनिवृत्तचित्ताय तस्मै शिवाय पवित्रां हिमवतः सुतां प्रीणयितुं प्रयत्नं कुरु । स्त्रीषु मध्ये शिववरेतःक्षरणक्षमा पार्वत्येवास्ति । एवं ब्रह्मणा कथितम् ।

हिन्दी—विषयों से निवृत्त-चित्तवृत्तिवाले उन शिव के लिए पवित्र हिमालय-पुत्री पार्वती को प्रसन्न करने के लिए प्रयत्न करो । स्त्रियों में शिवजी के वीर्यनिषेकयोग्य पार्वती ही हैं, ऐसा ब्रह्माजी ने कहा है ।।१६।।

गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम् ।
अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः ॥१७॥

अन्वयः—नगेन्द्रकन्या च गुरोः नियोगात् अधित्यकायां तपस्यन्तं स्थाणुम् अन्वास्ते, इति मया अप्सरसां मुखेभ्यः श्रुतं, स वर्गः मत्प्रणिधिः अस्ति ।

व्याख्या—गुरोरिति । नगेन्द्रकन्या—न गच्छन्तीति नगाः, तेषामिन्द्रः नगेन्द्रस्तस्य कन्या नगेन्द्रकन्या=हिमालयसुता पार्वती च । गुरोः = पितुः हिमालयस्य । नियोगात्=आदेशात् । अधित्यकायाम् = ऊर्ध्वभूमौ ('भूमिरूर्ध्वमधित्यका' इत्यमरः) । तपस्यन्तं=तपश्चरन्तम् । स्थाणुं=भवम् ('व्योमकेशो भवो भीमः स्थाणू

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रुद्र उमापतिः' इत्यमरः) । अन्यास्ते=उपास्ते । इति=एवम् । मया=सुरेन्द्रेण । अप्सरसां=स्वर्वेश्यानाम् ('स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः' इत्यमरः) । मुखेभ्यः=आननेभ्यः । श्रुतम्=आकर्णितम् । स वर्गः=अप्सरसां समुदायः । मत्प्रणिधिः=मम गुप्तचरः अस्तीति ।

सरलार्थः—'सम्प्रति हिमालयसुता पार्वती स्वपितुरनुज्ञया पर्वतस्योर्ध्वभूमौ तपश्चरन्तं शिवमुपास्ते' । इति मया अप्सरसां समुदायेन श्रुतम् । सः समुदायः एव मम गुप्तचरोऽस्ति ।

हिन्दी—इस समय नगेन्द्रकन्या पार्वती अपने पिता की आज्ञा से हिमालय शिखर पर तपस्या कर रही शिवजी की उपासना कर रही हैं, ऐसा मैंने (इन्द्रने) अप्सरा-समूह द्वारा सुना है । यही अप्सरासमूह मेरा गुप्तचर है ।१७।

तद् गच्छ सिद्धयै कुरु देवकार्यमर्थोऽयमर्थान्तरभाव्य एव ।
अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः ॥१८॥

अन्वयः—तत् सिद्धयै गच्छ, देवकार्यं कुरु । अयम् अर्थः अर्थान्तरभाव्यः एव बीजाङ्कुरः उदयात् प्राक् अम्भ इव त्वाम् उत्तमं प्रत्ययम् अपेक्षते ।

व्याख्या—तदिति । तत्=तस्मात् । सिद्धयै=सिद्धिनिमित्तम् । गच्छ=याहि । देवकार्यम्—देवानां कार्यं, तत्=सुरकार्यम् । कुरु=विधेहि । अयम्=एषः । अर्थः=प्रयोजनम् । अर्थान्तरभावः—अन्यः अर्थः अर्थान्तरम्; अर्थान्तरेण भाव्यः अर्थान्तरभाव्यः=अन्यकरणसाध्यः एव । बीजाङ्कुरः—बीजेन साध्यः अङ्कुरः । उदयात्=उत्पत्तेः । पूर्वं=प्राक् । अम्भः इव=वारीव । त्वाम्=मदनम् । उत्तमं=श्रेष्ठम् । प्रत्ययं=कारणम् । अपेक्षते=वांछति । अत्रोपमालङ्कारः ।

सरलार्थः—सखे ! तस्मात्कारणात् सिद्धिनिमित्तं गच्छ, सुरकार्यं च साधय । यथा बीजमङ्कुरणाय सर्वप्रथमं जलमपेक्षते तथैव तच्चित्ताकर्षणाय प्रकृष्टकारणभूतं त्वामपेक्षते ।

हिन्दी—हे सखे ! अतएव शिवपार्वती के संगम से होनेवाले सेनापति के लाभ की सिद्धि हेतु जाओ तथा देवकार्य करो । जिस प्रकार बीज अङ्कुरण के लिए जल की अपेक्षा करता है उसी प्रकार पार्वती के सान्निध्य से होनेवाला चित्ताकर्षणरूपी देवकार्य भी तुम्हारी अपेक्षा करता है ॥१८॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तस्मिन्सुराणां विजयाभ्युपाये तवैव नामास्त्रगतिः कृती त्वम् ।
अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म ॥१९॥

अन्वयः—सुराणां विजयाभ्युपाये तस्मिन् अस्त्रगतिः तव एव नाम, (अतः) त्वं कृती । हि अप्रसिद्धम् अपि अनन्यसाधारणम् एव कर्म पुंसां यशसे भवति ।

व्याख्या—तस्मिन्निति । सुराणाम्=अमराणाम् । विजयाभ्युपाये—विजयस्य अभ्युपायः, तस्मिन् जयोपायभूते । तस्मिन्=शिवे । अस्त्रगतिः=आयुधगतिः । तव=ते एव नाम । (अतः) त्वं=भवान् । कृती=पुण्यवान् असि । हि=यतः । अप्रसिद्धम्=अविख्यातम् अपि । अनन्यसाधारणम्=अलौकिकमेव । कर्म=कृत्यम् । पुंसां=नराणाम् ('स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः' इत्यमरः) । यशसे=कीर्त्यै भवति ('यशः कीर्तिः समज्ञा च' इत्यमरः) ।

सरलार्थः—सुराणां जयोपायभूते शिवे शस्त्रगतिः=अक्षतप्रसरः तव एव नाम । अतस्त्वं पुण्यवान् असि । यतो हि अप्रसिद्धम् अपि लोकोत्तरं कार्यमेव कीर्त्यै भवति ।

हिन्दी—देवताओं की विजय के उपायभूत शिव पर केवल तुम्हारे शस्त्र की ही गति सम्भव है । सो तुम धन्य हो । क्योंकि अप्रसिद्ध होने पर भी अलौकिक कार्य से ही कीर्ति प्राप्त होती है ॥१९॥

सुराः समभ्यर्थयितार एते कार्यं त्रयाणामपि विष्टपानाम् ।
चापेन ते कर्म न चातिहिंस्रमहो ! बतासि स्पृहणीयवीर्यः ॥२०॥

अन्वयः—एते सुराः समभ्यर्थयितारः, कार्यं त्रयाणामपि विष्टपानाम् । कर्म ते चापेन अतिहिंस्रं च न । अहो बत स्पृहणीयवीर्यः ।

व्याख्या—सुरा इति । एते=इमे । सुराः=विबुधाः । समभ्यर्थयितारः—अभ्यर्थनाकारकाः । (सन्ति) कार्यम्=कृत्यम् । त्रयाणाम् अपि विष्टपानां=त्रिविष्टपानां देवानाम् अस्ति । कर्म=क्रिया । ते=तव । चापेन=कार्मुकेन । अतिहिंस्रम्=अतिघातकम् नास्ति । अहो=आश्चर्यम् । बत=सन्तोषः (यत् त्वम्) स्पृहणीयवीर्यः—स्पृहयितुं योग्यं स्पृहणीयम्, तद्वीर्यं यस्य सः=स्पृहणीयवीर्यः=वाञ्छनीयपराक्रमः असि ।

सरलार्थः—सर्वेषामपि वरदाः सुराः त्वां प्रार्थयन्ति । सेनापतिप्राप्तिकार्यं त्रिभुवनानां हितकरम् । तव धनुषा साध्यमेतत्कार्यं तपोमात्रहिंसया नास्ति कस्यापि प्राणसङ्कटम् । अहो ! तव पुरुषार्थः सर्वेषां श्लाघनीयोऽस्ति ।

CC-O. Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी--जो देवता सभी को वरदान देते हैं वही तुम्हारे याचक हैं। तुम्हारे धनुष से हो सकने वाला यह कार्य तपस्या को भङ्ग करने मात्र से किसी का प्राणघातक नहीं है। अहो! तुम्हारा पुरुषार्थ सभी लोगों के लिए प्रशंसनीय है ॥२०॥

मधुश्च ते मन्मथ ! साहचर्यादसावनुक्तोऽपि सहाय एव।
समीरणो नोदयिता भवेति व्यादिश्यते केन हुताशनस्य ॥२१॥

अन्वयः—हे मन्मथ ! असौ मधुः च ते साहचर्यात् अनुक्तः अपि सहायः एव। समीरणः हुताशनस्य नोदयिता भव' इति केन व्यादिश्यते।

व्याख्या—मधुरिति। हे मन्मथ=हे मदन ! असौ=सः। मधुः=वसन्तः च। ते=तव। साहचर्यात्=सख्यत्वात्। अनुक्तः=अकथितः अपि। सहायः=सहयोगी एव। समीरणः=पवनः ('समीरमारुतमरुज्जगत्प्राणसमीरणः' इत्यमरः)। हुताशनस्य=वह्नेः ('हिरण्यरेता हुतभुग्दहनो हव्यवाहनः' इत्यमरः)। नोदयिता=प्रेरयिता। भव। इति=एवम्। केन व्यादिश्यते=न केनापि कथ्यते। अत्र प्रतिवस्तूपमालङ्कारः।

सरलार्थः—हे कामदेव ! त्वया यद्वसन्तः सहायकरूपेण कथितः 'स तु अकथित एव प्रकृत्या सहायः'। पवनः कस्यापि प्रेरणया विनैव वह्नेः सहायतां करोति।

हिन्दी—हे मदन ! यह वसन्त तो बिना कहे ही तुम्हारा सहयोगी है। समीरण 'अग्नि को प्रेरित करने वाले बनो' इस प्रकार कौन कहता है, वह तो प्रकृति से ही उसका सहायक होता है ॥२१॥

तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे।
ऐरावतास्फालनकर्कशेन हस्तेन पस्पर्श तदङ्गमिन्द्रः ॥२२॥

अन्वयः—तथा इति भर्तुः शेषाम् इव आज्ञां मूर्ध्ना आदाय मदनः प्रतस्थे। इन्द्रः ऐरावतास्फालनकर्कशेन हस्तेन तदङ्गं पस्पर्श।

व्याख्या—तथेति। तथा इति=एवमस्तु इति। भर्तुः=स्वामिनः इन्द्रस्य। शेषाम् इव=प्रसादरूप-प्रदत्तामिव। आज्ञाम्=आदेशम्। ('माल्याक्षतादिदाने स्त्री शेषा' इति वैजयन्ती)। मूर्ध्ना=शिरसा ('शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः)। आदाय=स्वीकृत्य। मदनः=कामः। प्रतस्थे=चचाल। इन्द्रः=शक्रः।

CC-O. In Public Domain. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

ऐरावतस्फालनकर्कशेन—ऐरावतस्य=सुरगजस्य आस्फालनं=ताडनम्, तेन कर्कशः=कठोरस्तेन ('ऐरावतोऽभ्रमातङ्गौ रावणाभ्रमुवल्लभाः'। इत्यमरः। 'कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढम्।' इत्युभौ अमरः) हस्तेन=करेण। तदङ्गम्=तस्य मदनस्य। अङ्गम्=शरीरम्। परपर्श=स्पर्शं चकार। अत्रोपमोत्प्रेक्षयोः सन्देहसंकरः।

सरलार्थः—कामदेवः 'एवमेव करिष्यामि' इति स्वामिनो महेन्द्रस्याज्ञां शिरसि धृत्वा ततश्चचाल। शुक्रः ऐरावतताडनकठिनेन करेण मदनशरीरमस्पृशत्।

हिन्दी—कामदेव 'ऐसा ही करूँगा' इस प्रकार महेन्द्र की आज्ञा शिरोधार्य कर चल दिये। महेन्द्र ने ऐरावत को पीटने के कारण कठोर बने हाथ से (जाते समय आशीर्वाद रूप में उसके शरीर का स्पर्श किया ॥२२॥

स माधवेनाभिमतेन सख्या, रत्या च साशङ्कमनुप्रयातः।
अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम ॥२३॥

अन्वयः—सः अभिमतेन सख्या माधवेन रत्या च साशङ्कम् अनुप्रयातः अङ्गव्ययप्रार्थितकार्यसिद्धिः हैमवतं स्थाण्वाश्रमं जगाम।

व्याख्या—स इति। सः=असौ मदनः। अभिमतेन=अभीष्टेन। सख्या=मित्रेण। माधवेन=वसन्तेन। रत्या=स्वपत्न्या च। साशङ्कम्—आशङ्कया सहितम्। अनुप्रयातः=अनुगतः सन्। अङ्गव्ययप्रार्थितस्य=अङ्गव्ययेन प्रार्थिता अङ्गव्ययप्रार्थिता, कार्यस्य सिद्धिः कार्यसिद्धिः, अङ्गव्ययप्रार्थिता कार्यसिद्धिर्येन सः=शरीरक्षयप्रार्थितसाफल्यः। हैमवतं=हिमवति भवं हैमवतं=हिमालयस्थितम्। स्थाण्वाश्रमम्—स्थाणोः=महादेवस्य आश्रमम्=तपःस्थानम् ('स्थाणू रुद्र उमापतिः' इत्यमरः)। जगाम=अगच्छत्।

सरलार्थः—मदनः स्वमित्रेण वसंतेन स्वप्रियया रत्या च सभयमनुगतः 'मृत्वाऽपि सुरकार्यं साधयिष्यामि' इतिकृत्वा हिमालयस्थितं महेश्वराश्रममगच्छत्।

हिन्दी—कामदेव अपने प्रियमित्र वसन्त तथा प्रिया रति से सभय (डर के साथ) अनुगत 'शरीर नष्ट करके भी देवताओं का कार्य करूँगा' यह संकल्प कर हिमालय पर स्थित महादेव के आश्रम पर गये ॥२३॥

हराश्रमे कामोद्दीपनार्थं वसन्तस्य प्रादुर्भावः—

तस्मिन् वने संयमिनांमुनीनां तपःसमाधेः प्रतिकूलवर्ती।
सङ्कल्पयोनेरभिमानभूतमात्मानमाधाय मधुर्जजृम्भे ॥२४॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—तस्मिन् वने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलवर्ती मधुः संकल्पयोनेः अभिमानभूतम् आत्मानम् आधाय जजृम्भे ।

व्याख्या—तस्मिन्निति । तस्मिन् वने = तस्मिन्कानने ('अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः) । संयमिनां=समाधिमताम् । मुनीनाम् = ऋषीणाम् । तपःसमाधेः—तपसः = तपस्यायाः समाधेः=चित्तैकाग्र्यायाः । प्रतिकूलवर्ती—प्रतिकूलं = विपरीतं वर्तत इति प्रतिकूलवर्ती = विरोधी । मधुः = वसन्तः । संकल्पयोनेः—संकल्पः योनिः यस्य सः तस्य=कामदेवस्य ('संकल्पः कर्मसानसम्' इत्यमरः) । अभिमानभूतम्—अभिमानः=अहङ्कारः भूतः अभिमानभूतः, तम्=अहङ्कारकारणभूतम् । आत्मानम्=स्वम् । आधाय=सन्निधाय । जजृम्भे=प्रादुर्बभूवः ।

सरलार्थः—तस्मिन्नरण्ये समाधिमतामृषीणां विरोधी वसन्तः मनोभवस्य कामस्याहंकारकारणभूतमात्मानं प्रादुर्बभूव ।

हिन्दी—उस वन में संयमित मुनियों के विरोधी वसन्त ने मनोभव कामदेव के अहंकार के कारणभूत अपने को प्रकट किया ॥२४॥

कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिःश्वासमिवोत्ससर्ज ॥२५॥

अन्वयः—उष्णरश्मौ समयं विलंघ्य कुबेरगुप्तां दिशं गन्तुं प्रवृत्ते सति दक्षिणा दिक् मुखेन गन्धवहं व्यलीकनिःश्वासम् इव उत्ससर्ज ।

व्याख्या—कुबेरगुप्तामिति । उष्णरश्मौ—उष्णाः रश्मयः यस्य सः उष्णरश्मिस्तस्मिन्=सूर्ये । समयं = दक्षिणायनकालम् । विलंघ्य = व्यतिक्रम्य । कुबेरगुप्तां—कुबेरेण गुप्ता कुबेरगुप्ता, ताम्=धनेशरक्षिताम् । दिशम् = आशाम् ('कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः । दिशस्तु रुकुभः काष्ठा आशाश्च हरितश्च ताः ।' इत्युभौ अमरः ।) उदीचीं दिशम् । गन्तुं=चलितुम् । प्रवृत्ते सति=संलग्ने सति । दक्षिणा दिक्=अवाचीदिशा । मुखेन = पुरोभागेन, आननेन च । गन्धवहं—गन्धं वहतीति, तम्=अनिलम् ('पृषदश्वो गन्धवहो गन्धवाहोऽनिलाऽशुगाः' इत्यमरः) व्यलीकनिःश्वासं—व्यलीकेन निःश्वासः व्यलीकनिःश्वासस्तम्=दुःखनिःश्वासम् इव=यथा ('व्यलीकं त्वप्रियेऽनृते' इति वैजयन्ती) उत्ससर्ज=विसर्जयामास । अत्रोत्प्रेक्षालंकारः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—दक्षिणायनसमयमतिक्रम्य कुबेररक्षितामुत्तरां दिशां प्रयातुं प्रवृत्ते सति सवितरि दक्षिणदिशा स्वमुखेन मलयानिलं दुःखनिःश्वासमिवोत्सर्जं। यथा हि मर्यादामतिक्रम्य परनायिकासमागमरते सति स्वनायके काचिन्नायिका दुःखातिशयेन नि.श्वसतीति।

हिन्दी—सूर्यके दक्षिणायन काल की मर्यादा का परित्याग कर कुबेर-रक्षित उत्तर दिशा में प्रवृत्त होने पर दक्षिणदिशा सामने को गन्धवह पवन (मलयानिल) को दुःखनिःश्वास के समान छोड़ने लगी ॥२५॥

असूत सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि।
पादेन नापैक्षत सुन्दरीणां सम्पर्कमासिञ्जितनूपुरेण ॥२६॥

अन्वयः—अशोकः सद्यः स्कन्धात् प्रभृति एव सपल्लवानि कुसुमानि असूत, सुन्दरीणाम् आसिञ्जितनूपुरेण पादेन सम्पर्कं न अपैक्षत।

व्याख्या—असूतेति। अशोकः=अशोकपादपः ('वञ्जुलोऽशोके' इत्यमरः)। सद्यः=सपदि। स्कंधात् प्रभृति=स्कंधदेशादारभ्य एव। सपल्लवानि=पल्लवैः=दलैः सहितानि सपल्लवानि=पत्रयुक्तानि। कुसुमानि=पुष्पाणि। असूत=उत्पादयामास। सुन्दरीणाम्=कामिनीनाम्। आसिञ्जितनूपुरेण = आसिञ्जितः=शब्दायमानः नूपुरः=मञ्जीरः यस्य सः, तेन=ध्वन्यमानमञ्जीरेण। पादेन=चरणेन ('पादाङ्घ्रिदं तुला कोटिर्मञ्जीरो नूपुरोऽस्त्रियाम्' इत्यमरः)। सम्पर्कम्=सम्बन्धम्। न अपैक्षत=अपेक्षां न कृतवान्। अत्र विभावनाऽलङ्कारः।

सरलार्थः—अशोकपादपानां सर्वाङ्गेषु पल्लवानि पुष्पाणि जातानि। ते तदर्थं सुन्दरीणां शब्दायमानमञ्जीरयुक्तं पदप्रहारं नापैक्षन्त।

हिन्दी—अशोक वृक्ष तत्काल तने से लेकर सम्पूर्ण पल्लवों सहित पुष्पों से लद गया। उसने पुष्प-पल्लवनार्थ शब्दायमान मञ्जीरपाद-प्रहार की अपेक्षा नहीं की ॥२६॥

टिप्पणी—प्रमदाओं के पाद-प्रहार से असमय में ही अशोक फूल उठता है ऐसा कहा जाता है—

पादाहतः प्रमदया विकसत्यशोकः, शोकं जहाति वकुलो मुखसीधुसिक्तः।
आलोकितः कुरवकः कुरुते विकासमालोडितस्तिलक उत्कलिको विभाति ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

आम्र-पुष्पोद्गमं वर्णयति—

सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे।
निवेशयामास मधुर्द्विरेफान् नामाक्षराणीव मनोभवस्य ॥२७॥

अन्वयः—मधुः प्रवालोद्गमचारुपत्रे नवचूतबाणे समाप्तिं नीते सति सद्यः मनोभवस्य नामाक्षराणि इव द्विरेफान् निवेशयामास।

व्याख्या—सद्य इति। मधुः=वसन्तः। प्रवालोद्गमचारुपत्रे–प्रवालानामुद्गमाः प्रवालोद्गमाः त एव चारुपत्राणि यस्य सः, तस्मिन्=पल्लवांकुरसुन्दरपक्षे ('सुन्दरं रुचिरं चारु सुषम साधु शोभनम्' 'पत्रं वाहनपक्षयोः' इत्यमरः)। नवचूतबाणे–नव=नूतनं च तत् चूतम्=आम्रम् नवचूतम्, तदेव बाणस्तस्मिन्=नूतनाम्रशरे। समाप्तिम्=सम्पूर्णताम्। नीते=प्रापिते सति। सद्यः सपदि। मनोभवस्य—मनसि भवः मनोभवस्तस्य=कामदेवस्य। नामाक्षराणि इव=अभिधानवर्णानि इव ('शम्बराऽरिर्मनसिजः कुसुमेषुरनन्यजः' 'आख्याह्वे अभिधानं च नामधेयं च नाम च।' इत्यमरः)। द्विरेफान्–द्वौ रेफौ येषां ते द्विरेफाः, तान् द्विरेफान् = अलीन् (द्विरेफपुष्पलिड् भृङ्गषट्पदभ्रमरालयः' इत्यमरः)। निवेशयामास=प्रवेशयामास। अत्रोत्प्रेक्षालङ्कारः।

सरलार्थः–वसन्तः पल्लवाङ्कुरसुन्दरपक्षे नूतनरसालशरे सम्पूर्णतां प्रापिते सति तत्क्षण मनोभवस्य कामस्य नामद्योतकान्यक्षराणीवालीन् प्रवेशयामास।

हिन्दी—वसन्त ने पल्लवांकुरों के सुन्दर पत्र पर नूतन आम्र-मञ्जरी-रूपी बाण के समाप्त हो जाने पर तत्काल मनोभव कामदेव के नामाक्षरों के भ्रमरों को प्रविष्ट कराया ॥२७॥

वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः।
प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ।२८।

अन्वयः—कर्णिकारं वर्णप्रकर्षे सति निर्गन्धतया चेतः दुनोति स्म। प्रायेण विश्वसृजः प्रवृत्तिः गुणानां सामग्र्यविधौ पराङ्मुखी भवति।

व्याख्या-वर्णप्रकर्ष इति। कर्णिकारं=कर्णिकार-पुष्पम् ('कर्णिकारः परिव्याधः' इत्यमरः)। वर्णप्रकर्षे सति–वर्णानां प्रकर्षः वर्णप्रकर्षस्तस्मिन्=रङ्गोत्कर्षे सति। निर्गन्धतया—निर्गतो गन्धः यस्मात्तत् निर्गन्धम् तस्य भावो निर्गन्धता, तया=सुरभिशून्यतया चेतः=मनः ('चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः'

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इत्यमरः)। दुनोति स्म=पीडयति स्म। प्रायेण=प्रायशः। विश्वसृजः—विश्वं=संसार सृजति=उत्पादयति इति विश्वसृड्, तस्य विश्वसृजः=ब्रह्मणः। ('स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः' इत्यमरः)। प्रवृत्तिः=व्यापारः। गुणानां=वैशिष्ट्यानाम्। सामग्र्यविधौ—समग्रस्य भावः सामग्र्यम्, तस्य विधौ=सम्पूर्णताविधाने ('विधिर्विधाने दैवे च' इत्यमरः)। पराङ्मुखी—पराङ्=पश्चान्मुखं=वदनं यस्य सः=विरोधीभवतीति। अत्रार्थान्तरन्यासोऽलङ्कारः।

सरलार्थः—कर्णिकारपुष्पं रङ्गोत्कृष्टं भवति परञ्च तस्य निर्गन्धता चित्तं पीडयति। प्रायः विधाता सर्वेषु पदार्थेषु गुणन्यूनता अवश्यमेव करोति, गुणसम्पूर्णतां कथमपि न विदधाति।

हिन्दी—कनेर पुष्प गहरे रंग का होते हुए भी निर्गन्ध होने के कारण मन को व्याकुल कर रहा था। प्रायः विधाता गुणों की पूर्णता के विधान में विरोधी बने रहते हैं अर्थात् सभी में किसी न किसी गुण की कमी अवश्य कर देते हैं, सम्पूर्ण-गुणसम्पन्नता नहीं रखते हैं॥२८॥

बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥ २९॥

अन्वयः—अविकासभावात् बालेन्दुवक्राणि अतिलोहितानि पलाशानि वसन्तेन समागतानां वनस्थलीनां सद्यः नखक्षतानि इव बभुः।

व्याख्या—बालेन्द्विति। अविकासभावात्—विकासस्य भावो विकासभावः, न विकासभावः अविकासभावस्तस्मात्=अविकसितत्वात्। बालेन्दुवक्राणि—बालेन्दोः=बालविधोः इव वक्राणि=कुटिलानि ('हिमांशुश्चन्द्रमा चन्द्रः इन्दुः कुमुदबान्धवः' इत्यमरः।) ('आविद्ध कुटिलं भुग्नं वेल्लितं वक्रमित्यपि' इत्यमरः)। अतिलोहितानि=गाढरक्तवर्णानि। ('लोहितो रोहितो रक्तः शोणः कोकनदच्छविः' इत्यमरः)। पलाशानि=किंशुकपुष्पाणि ('पलाशे किंशुकः पर्णः' इत्यमरः)। वसन्तेन=मधुना। समागतानां=सङ्गतानाम्। वनस्थलीनाम्—वनस्य स्थल्यः वनस्थल्यस्तासाम् ('अटव्यरण्यं विपिनं गहनं कानन वनम्।' 'स्थलं स्थली' इति चाप्यमरः)। सद्यः=सपदि। नखक्षतानि—नखस्य क्षतानि=कररुहक्षतानि ('पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्' इत्यमरः)। इव=यथा। बभुः=शुशुभिरे। अत्रोत्प्रेक्षालङ्कारः।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—मुकुलभावाद् बालचन्द्रवद्वक्र गाढरक्तानि पलाशपुष्पाणि वसन्तसौरभेण संगतानां वन्यभूमीनां स्त्रीणां सद्यः नखरक्षतानि सदृशं शुशुभिरे।

हिन्दी—अविकसित होने के कारण बाल चन्द्रमा जैसे वक्र गहरे लाल रंग के टेसू के फूल वासन्ती सुगन्ध के सम्पर्क मे आई वनस्थली रूपी स्त्री के ताजे नखक्षतों जैसे सुन्दर शोभित हो रहे थे ॥ २९ ॥

लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।
रागेण बालारुणकोमलेन चूतप्रबालोष्ठमलञ्चकार ॥ ३० ॥

अन्वयः—मधुश्रीः लग्नद्विरेफाञ्जनभक्तिचित्रं तिलकं मुखे प्रकाश्य बालारुणकोमलेन रागेण चूतप्रबालोष्ठम् अलञ्चकार ।

व्याख्या—लग्नद्विरेफेति । मधुश्रीः = वसन्तसुषमा । लग्नद्विरेफाञ्जनभक्तिचित्रम्—द्वौ रेफौ येषां ते द्विरेफाः = भ्रमराः, लग्नाः—संलग्नाश्च ते द्विरेफा इति लग्नद्विरेफाः, अञ्जनस्य = कज्जलस्य, भक्तयः कज्जलभक्तयः, लग्नद्विरेफा एवाञ्जनभक्तयस्ताभिश्चित्रमिति तत् = संलग्नालिकज्जलरचनाचित्रवर्णम् । तिलकं = तिलकस्य पुष्पं ('तिलकः क्षुरकः श्रीमान्' तथा 'तमाल पत्रतिलकचित्रकाणि विशेषकम्' इत्यमरः) । मुखे=आनने । प्रकाश्य=रचयित्वा, बालारुणकोमलेन—बालशचासौ अरुणः बालारुणः, बालारुण इव कोमलस्तेन=बालसूर्य सुन्दरेण ('अरुणो भास्करेऽपि स्यात् वर्णभेदेऽपि च त्रिषु' इत्यमरः) । रागेण=लोहितवर्णेन लाक्षारसेन । चूतप्रबालोष्ठम्—चूतस्य=रसालस्य प्रबालाः= पल्लवाः त एव ओष्ठस्तम्=चूतपल्लवाधरम् । अलंचकार = विभूषितवान् । अत्ररूपकालङ्कारः ।

सरलार्थः—वसन्तसुषमालग्नालिकज्जलचित्रवर्ण तिलकमानने प्रकटय्य बालरविरक्तवर्णेन लाक्षारसेनाम्रपल्लवाधरं प्रसाधयामास ।

हिन्दी—वसन्तश्रीरूपी स्त्री ने भौंरेरूपी काजल से युक्त तिलक पुष्परूपी तिलक मुख पर अंकित कर बालरवि की लालिमा वाले लाक्षारस (महावर) से आम्रपल्लवरूपी ओष्ठ को अलंकृत किया ॥ ३० ॥

अथ जंगामानां विकारमाह—

मृगाः प्रियाद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः ।
मदोद्धताः प्रत्यविलं विचेरुर्नखक्षतीर्मर्मरपत्रमोक्षाः ॥ ३१ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—प्रियालद्रुममञ्जरीणां रजःकणैः विच्छिनतदृष्टिपाताः मदोद्धताः मृगाः प्रत्यनिलं मर्मरपत्रमोक्षाः वनस्थलीः विचेरुः ।

व्याख्या – मृगा इति । प्रियालद्रुममञ्जरीणां – प्रियालानां = राजादनानां द्रुमाः = पादपाः, तेषां मञ्जर्यः = वल्लर्यस्तासाम् । ('राजादनः प्रियालः स्यात्' इत्यमरः) । रजःकणैः=परागकणैः । ('स्त्रियां माता त्रुटी पुसि लवलेशकणाऽणवः' इत्यमरः) । विच्छिनतदृष्टिपाताः—विच्छिनः संजातः येषां ते विच्छिनाः, दृष्टीनां पाताः दृष्टिपाताः, विच्छिनाः दृष्टिपाताः, विच्छिनतदृष्टिपाताः, विच्छिनदृष्टिपाताः येषां ते–संजातविच्छिनेत्रप्रसाराः । ('विघ्नोऽन्तराय: प्रत्यूहः' इत्यमरः) । मदोद्धताः=मदमत्ताः । मृगाः=हरिणाः ('मृगे कुरङ्गवातायुहरिणाजिनयोनयः' इत्यमरः) । प्रत्यनिलम्=पवनाभिमुखम् । मर्मरपत्रमोक्षाः—'मर्मर' इति शब्दोऽस्ति येषां ते मर्मराः, पत्राणां मोक्षाः पत्रमोक्षाः, मर्मराः पत्रमोक्षा यासु ताः–मर्मरध्वनिवर्जीर्णदलपाताः । ('अथ मर्मरः । स्वनिते वस्त्रपर्णानाम्' इत्यमरः । 'पत्रं पलाशं छदनं दलं पर्ण छदः पुमान्' इति चाप्यमरः) । वनस्थलीः=विपिनस्थलीः । विचेरुः=अविचरन् । अत्र स्वभावोक्त्यलङ्कारः ।

सरलार्थः—राजादनवृक्षवल्लरीणां परागकणैः संजातविघ्ननेत्रपाताः मदमत्ताः हरिणाः पवनसमक्षं मर्मरध्वनिसमजीर्णपर्णपाताः वन्यभूमीः विचरितवन्तः।

हिन्दी—प्रियाल (पलाश) वृक्षों की मञ्जरी के परागकणों के गिरने से आच्छादित दृष्टिवाले मदोद्धत हरिण वायु के सामने मर्मरध्वनि के सदृश जीर्ण पत्तों वाली वनस्थलियों में विचरण करने लगे ॥ ३१ ॥

चूताङ्कुरस्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकोज ।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥ ३२॥

अन्वयः—चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलः यत् मधुरं चुकूज, तद् एव मनस्विनीमानविघातदक्षं स्मरस्य वचनं जातम् ।

व्याख्या—चूताङ्कुरेति । चूताङ्कुरास्वादकषायकण्ठः—चूतानामङ्कुराश्चूताङ्कुरास्तेषामास्वादेन कषायः कण्ठः यस्य सः = रसालाङ्कुरास्वादरक्तकण्ठः ('अंकुरोऽभिनवोद्भिदिः' इत्यमरः । 'रसभावपथे रक्ते कषायः' इति केशवः) । पुंस्कोकिलः–पुमांश्चासौ कोकिलः पुस्कोकिलः = पिकः । यत् मधुरं=

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
मनोरमम् । चुकूज=अकूजत् । तत् एव =मधुरं कूजनम् एव । मनस्विनीमानविघात-दक्षम्—मनस्विनीनां मानः मनस्विनीमानः तस्य विघाते दक्षं तम्—मनस्विनी-मानविघातदक्षम् = अभिमानिनीमाननिरासकुशलम् । स्मरस्य = मदनस्य । वचनं = भाषितम् ('व्याहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः) । जातम् = बभूव । अत्र रूपकालङ्कारः ।

सरलार्थः—आम्राङ्कुरास्वादरक्तकण्ठदेशः परभृतः यन्मनोरममकूजत् तदेव मानिनीमाननिरास-निपुणं स्मरभाषितं बभूव ।

हिन्दी—आम्र-मञ्जरी के आस्वाद के कारण रक्त कण्ठ (मनोरमकण्ठ) वाले कोकिल ने जो कल-कूजन किया वही मानिनी नारी के मान को नष्ट करने में निपुण कामदेव का वचन हो रहा था ॥ ३२ ॥

हिमशिखरवासिनीनां किन्नरीणां तात्कालिकं विकारं कविर्वर्णयति—

हिमव्यपायाद्विशदाधराणामापाण्डरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किंपुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ॥३३॥

अन्वयः—हिमव्यपायात् विशदाधराणाम् आपाण्डरीभूतमुखच्छवीनां किंपुरुषाङ्गनानां पत्रविशेषकेषु स्वेदोद्गमः पदं चक्रे ।

व्याख्या – हिमेति । हिमव्यपायात्—विशिष्टः अपायः व्यपायः, हिमस्य व्यपायः हिमव्यपायस्तस्मात् = तुषारापगमकारणात् ('तुषारस्तुहिनं हिमम्' इत्यमरः) । विशदाधराणाम् = स्फुटोष्ठानाम् । आपाण्डरीभूतमुखच्छवीनाम्—ईषत्पाण्डरा आपाण्डरा, आपाण्डरीभूता मुखच्छविर्यासां ताः, तासाम् = किञ्चिच्छुभ्रवदनच्छवीनाम् ('शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डरा' इत्यमरः) । किंपुरुषाङ्गनानां –किंपुरुषाणां = अश्वमुखानाम् अङ्गनाः = नार्यस्तासाम् = किन्नरस्त्रीणाम् । पत्रविशेषकेषु–पत्राणां विशेषकाणि, तेषु=विशिष्टपत्ररचनासु । स्वेदोद्गमः—स्वेदस्य = निदाघस्योद्गमः = उत्पत्तिः ('घर्मो निदाघः स्वेदः स्यादि'त्यमरः) । पदं = स्थानम् । चक्रे=अकरोत् ।

सरलार्थः—तुहिनाभावात् स्फुटाधराणां किञ्चिच्छुभ्रच्छवीनां किन्नर-स्त्रीणां विशिष्टतिलकरचनासु स्वेदबिन्दवः स्थानं चक्रुः ।

हिन्दी—असमय में बर्फ के न गिरने के कारण शुभ्र अधरोंवाली, कुछ-कुछ श्वेतमुख-कान्तिवाली किन्नरस्त्रियों की तिलकरचनाओं में पसीना निकल आया ॥३३॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ।
प्रयत्नसंस्तम्भितविक्रियाणां कथञ्चिदीशा मनसां बभूवुः ॥३४॥

अन्वयः—स्थाणुवनौकसः तपस्विनः ताम् आकालिकीं मधुप्रवृत्तिं वीक्ष्य प्रयत्नसंस्तम्भितविक्रियाणां मनसां कथञ्चित् ईशाः बभूवुः ।

व्याख्या—तपस्विन इति । स्थाणुवनौकसः—स्थाणोः वनं स्थाणुवनं, तदेवौको येषां ते=स्थाणुवनौकसः=शिवाश्रमवासिनः ('स्थाणू रुद्र उमापतिरित्यमरः) । तपस्विनः=तापसाः । ताम्=तादृशीम् । आकालिकीम्=असामयिकीम् । मधुप्रवृत्तिं—मधोः=वसंतस्य प्रवृत्तिः=व्यापारस्ताम् । वीक्ष्य=अवलोक्य । प्रयत्नसंस्तम्भितविक्रियाणां—विरुद्धा क्रिया विक्रया, सम्यक्-स्तम्भिता संस्तम्भिता, प्रयत्नेन संस्तम्भिता विक्रियाः येषां तानि, तेषाम्=परिश्रमनिरुद्धविपरीतक्रियाणाम् । मनसां=चेतसाम् ('चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः) । कथंचित्=येन केन प्रकारेण । ईशाः=नियन्तारः । बभूवुः=अभूवन् ।

सरलार्थः—महेशाश्रमवासिनस्तपस्विजनाः असामयिकीं वसन्तप्रवृत्तिमवलोक्य परिश्रमनिरुद्धविकाराणां चेतसां नियन्तारः येन केनापि प्रकारेण बभूवुः ।

हिन्दी—महादेव के आश्रम पर रहने वाले तपस्वी उस असामयिक वासन्ती सुषमा को देखकर परिश्रम से तपश्चर्या के विरुद्ध क्रियाओं का निरोध करने के लिए बड़ी कठिनता से मन पर नियन्त्रण कर पा रहे थे ॥३४॥

तं वेशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने ।
काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ॥३५॥

अन्वयः—आरोपितपुष्पचापे रतिद्वितीये तं देशं प्रपन्ने सति द्वन्द्वानि काष्ठागतस्नेहरसानुविद्धं भावं क्रियया विवव्रुः ।

व्याख्या—तमिति । आरोपितपुष्पचापे—पुष्पाणां चापं पुष्पचापम् आरोपितं पुष्पचापं येन सः, तस्मिन्=सज्जीकृतसुमनकामुंके । रतिद्वितीये=रति-सहायके । मदने=कामे । तम्=उपर्युक्तम्, देशं=स्थानम् । प्रपन्ने=प्राप्ते सति । द्वन्द्वानि=युगलानि ('द्वन्द्व कलहयुग्मयोः' इत्यमरः) । काष्ठागतस्नेहरसानुविद्धं—काष्ठां गतः काष्ठागतः, काष्ठागत एव स्नेहरसः तेन अनुविद्धः तम्=उत्कर्षगतप्रेमरससम्पृक्तम् । ('काष्ठोत्कर्षे स्थितौ दिशि' इत्यमरः) । भावं=

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सम्भोगाभिलाषम्। क्रियया—क्रियते या सा क्रिया, तया। विवव्रुः=अप्रकाशयन्।

सरलार्थः—हराश्रमे रतिसहिते कुसुममयकार्मुके कामे आगते सति निखिलयुगलानि संवर्द्धितप्रेमरसानुविद्धं सम्भोगाभिलाष क्रियया प्रकटयामासुः।

हिन्दी—शिवजी के आश्रम पर कुसुमकार्मुक पर बाण चढ़ाय रति सहित कामदेव के प्रवेश करते ही (जड़-चेतन) सभी जोड़े (स्त्री-पुरुष) बढ़े हुए प्रेमरस से सराबोर सम्भोग की अभिलाषा क्रिया द्वारा प्रकट करने लगे ॥३५॥

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥३६॥

अन्वयः—द्विरेफः कुसुमैकपात्रे मधु स्वां प्रियाम् अनुवर्तमानः (सन्) पपौ। कृष्णसारः च स्पर्शनिमीलिताक्षीं मृगीं शृङ्गेण अकण्डूयत।

व्याख्या—मधुवित। द्विरेफः—द्वौ रेफौ यस्य सः द्विरेफः=भृङ्गः (द्विरेफ-पुष्पलिड्भृङ्गषट्पदभ्रमराऽलयः' इत्यमरः)। कुसुमैकपात्रे—कुसुममेव एक-पात्रं, तस्मिन्=पुष्पैकभाजने ('स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' इत्यमरः)। मधु=पुष्परसम्, स्वाम्=निजाम्। प्रियाम्=प्रेयसीं भ्रमरीम्। अनु-वर्तमानः—अनु=पश्चाद् वर्तत इति अनुवर्तमानः=अनुगच्छन् सन्। पपौ=अपिबत्। कृष्णसारः=कृष्णहरिणः ('कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः' इत्यमरः)। च=तथा। स्पर्शनिमीलिताक्षीं—स्पर्शेन निमीलिते अक्षिणी यस्याः सा, ताम्=स्पर्शसुखमीलितनयनाम्। मृगीं=हरिणीम्। शृङ्गेण=विषाणेन। अकण्डूयत=कण्डूयनं चकार। अत्र स्वभावोक्तिरलङ्कारः।

सरलार्थः—एकस्मिन्नेव पुष्परूपचषके भ्रमरः स्वां प्रेयसीं भ्रमरीमनु-सरन् सन् मधुपानमकरोत्, कृष्णमृगश्च स्पर्शसुखेन निमीलितनयनां मृगीं विषाणेन कण्डूयनं चकार।

हिन्दी—एकमात्र पुष्परूपी प्याले से अपनी प्रिया भ्रमरी का अनुसरण करते हुए भ्रमर ने मधुपान किया तथा काले मृग ने स्पर्श-सुख के कारण आँखें बन्द की हुई आँखों वाली मृगी को सींग से खुजलाया ॥३६॥

ददौ रसात्पङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः।
अर्धोपभुक्तेन बिसेन जायां सम्भावयामास रथाङ्गनामा ॥३७॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—रसात् करेणुः पङ्कजरेणुगन्धि गण्डूषजलं गजाय ददौ। रथाङ्गनामा अर्धोपभुक्तेन बिसेन जायां सम्भावयामास।

व्याख्या—ददाविति। रसात्=आनन्दात्। करेणुः=हस्तिनी। पङ्कजरेणुगन्धि—पङ्कात्जायते इति पङ्कजम्, तस्य रेणुः इति पङ्कजरेणुः, तस्य गन्धः अस्यास्तीति तत् पङ्कजरेणुगन्धि=पद्मपरागगन्धि। ('पङ्कोऽस्त्री शरदकर्दमौ' इति कोषः)। गण्डूषजलं=गण्डूषभृतं वारि ('आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्' इत्यमरः)। गजाय=हस्तिने ('मतङ्गजो गजो नागः कुञ्जरो वारणः करी।' इत्यमरः)। ददौ=अददात्। रथाङ्गनामा—रथस्याङ्गं=चक्रं, तन्नामा चक्रवाकः ('कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः' इत्यमरः)। अर्धोपभुक्तेन—अर्धम्=अपूर्णं यथा स्यात्तथोपभुक्तमित्यर्धोपभुक्तम्, तेन=अपूर्णखादितेन। बिसेन=मृणालेन ('मृणालं बिसम्' इत्यमरः)। जायां=पत्नीम् ('भार्या जायाऽथ पुंभूम्नि दाराः' इत्यमरः)। सम्भावयामास=उपभुक्तशेषं ददौ।

सरलार्थः—अनुरागात् हस्तिनी पद्मरजोगन्धि गण्डूषभृतं जलं हस्तिने ददौ। चक्रवाकपक्षी अर्धखादितं मृणालं स्वभार्यायै चक्रवाक्यै प्रायच्छत्।

हिन्दी—अनुराग के कारण हथिनी ने कमलरेणु से सुगन्धित गलफड़े में भरा जल हाथी को दिया तथा चक्रवाक (चकवे) ने अधखाये मृणाल को अपनी जाया (चकई) को दिया॥ ३७॥

गीतान्तरेषु श्रमवारिलेशैः किञ्चित्समुच्छ्वासितपत्रलेखम्।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुम्बे॥३८॥

अन्वयः—किंपुरुषः गीतान्तरेषु श्रमवारिलेशैः किञ्चित्समुच्छ्वासितपत्रलेख पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं चुचुम्बे।

व्याख्या—गीतान्तरेष्विति। किंपुरुषः=किन्नरः ('स्यात्किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः' इत्यमरः)। गीतान्तरेषु=गायनमध्येषु। श्रमवारिलेशः—श्रमस्य वारि श्रमवारि=स्वेदः, तस्य लेशाः=कणानि, तैः=स्वेदकणैः। किञ्चित्समुच्छ्वासितपत्रलेख—पत्राणां लेखाः पत्रलेखाः, किञ्चित्समुच्छ्वासिताः पत्रलेखाः यस्य तत्=स्तोकं विश्लेषितपत्रावलि। पुष्पासवाघूर्णितनेत्र-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शोभि —पुष्पाणामासवः पुष्पासवः = सुमनमद्यं, पुष्पासवेन आघूर्णिते ये नेत्रे, ताभ्यां शोभते तच्छील पुष्पासवाघूर्णितनेत्रशोभि=सुमनमद्योद्भ्रान्ताक्षिशोभि। प्रियामुखं=प्रेयसिवदनम्। ('वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः)। चुचुम्बे=चुम्बितवान्।

सरलार्थः—किन्नरः गायनमध्येषु स्वेदकणैः ईषद्विश्लेषितपत्रावलि-सुमन-सुरोद्भ्रान्ताक्षिशोभि प्रियाननं चुम्बितवान्।

हिन्दी—किन्नर गाने के बीच गान-श्रम से निकले स्वेदकणों से कुछ कुछ मिट गयी पत्ररचनावाले, कुसुमासव से लाल-लाल नयनों वाली प्रिया (किन्नरी) के मुख का चुम्बन करने लगे ॥३८॥

पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥ ३९ ॥

अन्वयः—तरवः अपि पर्याप्तपुष्पस्तबकस्तनाभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः लतावधूभ्यः विनम्रशाखाभुजबन्धनानि अवापुः।

व्याख्या— पर्याप्तेति। तरवः = पादपाः अपि ('वृक्षो महीरुहः शाखी विटपी पादपस्तरुः' इत्यमरः)। पर्याप्तपुष्पस्तबकस्तनाभ्यः—पुष्पाणां स्तबकाः पुष्पस्तबकाः, पर्याप्ताश्च ते पुष्पस्तबकाः पर्याप्तपुष्पस्तबकाः, त एव स्तनास्ताभ्यः=प्रचुरपुष्पगुच्छकुचाभ्यः ('स्तनौ कुचौ' इत्यमरः)। स्फुरत्प्रवालोष्ठमनोहराः—स्फुरन्तश्च ते प्रवालाः स्फुरत्प्रवालाः, त एव ओष्ठास्ताभिर्मनोहरास्ताभ्यः = स्फुरत्पल्लवाधरमनोरमाभ्यः। लतावधूभ्यः—लता एव वध्वस्ताभ्यः लतावधूभ्यः=वल्लीवधूभ्यः ('वल्ली तु व्रततिर्लता' इत्यमरः। 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः'इत्यमरः)। विनम्रशाखाभुजबन्धनानि—विनम्राः शाखाः विनम्रशाखाः, ताः एव भुजास्तैर्बन्धनानि तानि = नततरुबाहुबन्धनानि। अवापुः = प्रापुः। अत्र रूपकालङ्कारः।

सरलार्थः—पादपोऽपि प्रचुर-पुष्पस्तबककुचेभ्यः स्फुरत्पल्लवाधरमनोरमाभ्यः व्रततिनारीभ्यः, अवनतलताबाहुबन्धनानि प्राप्तवन्तः।

हिन्दी—वृक्ष भी कुसुमस्तबक रूपी स्तनों वाली, हिलते हुए पल्लवों रूपी अधरों से मनोरम बनी लता रूपी नारियों के द्वारा झुकी हुई शाखा रूपी भुजाओं से [illegible] आलिंगन करने लगे ॥३९॥

Sri Vidyabharati Book Development Project

CC-O. In Public Domain. Digitized by eGangotri

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥४०॥

अन्वयः—अस्मिन् क्षणे हरः श्रुताप्सरोगीतिः अपि प्रसंख्यानपरः बभूव । आत्मेश्वराणां विघ्नाः जातु समाधिभेदप्रभवः न भवन्ति ।

व्याख्या—श्रुतेति । अस्मिन् क्षणे = एतस्मिन्नवसरे । हरः = शम्भुः । श्रुताप्सरोगीतिः—अप्सरसां गीतिरप्सरोगीतिः, श्रुता अप्सरोगीतिर्येन सः = आकर्णितसुराङ्गनागानः अपि । प्रसंख्यानपरः=आत्मानुसन्धानसंलग्नः । बभूव= अभूत् । आत्मेश्वराणाम्—आत्मनः ईश्वराः आत्मेश्वरास्तेषाम् = जितेन्द्रियाणाम् ('स्वामी त्वीश्वरः पतिरीशितः' इत्यमरः) । विघ्नाः=बाधाः, जातु=कदाचित् । समाधिभेदप्रभवः—समाधेर्भेदः समाधिभेदः तस्मिन् प्रभवः इति समाधिभेद-प्रभवः=ध्यानभञ्जनसमर्थाः, न भवन्ति=नैव सन्ति । अत्रार्थान्तरन्यासोऽलङ्कारः ।

सरलार्थः—इत्थं सकलजडचेतनानां मनःसु कामवासनोत्पादककाले कपाली अपि चित्तवृत्तिमनिरुद्ध्य समाधिमागात् किञ्चिदपि न विरराम । यतः जितेन्द्रियाणां विघ्नाः कदाचित् अपि ध्यानभञ्जनसमर्था न भवन्ति ।

हिन्दी—इस प्रकार समस्त जड़-चेतन प्राणियों के मन में कामवासना को उपजाने वाले समय में भी शिवजी अपनी चित्तवृत्ति को स्थिर रखकर समाधि से जरा भी विचलित नहीं हुए; क्योंकि जितेन्द्रिय पुरुषों के मन में संसार को विचलित करने वाले पदार्थ भी कदापि क्षोभ उत्पन्न नहीं कर पाते हैं ॥ ४० ॥

लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः ।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान्व्यनैषीत् ॥४१॥

अन्वयः—अथ लतागृहद्वारगतः वामप्रकोष्ठार्पितहेमवेत्रः नन्दी मुखार्पितैकाङ्गुलिसंज्ञया एव गणान् चापलाय मा भवत इति व्यनैषीत् ।

व्याख्या—लतागृहेति । अथ = अनन्तरम् । लतागृहद्वारगतः = लताभिः निर्मितं गृहमिति लतागृहं, तस्य द्वारं गतः=प्रविष्टः गेहद्वारप्रयातः ('गृहं गेहोदवसितं वेश्मसद्मनिवेशनम्' इत्यमरः) । वामप्रकोष्ठार्पितहेमवेत्रः—वामश्चासौ-प्रकोष्ठः वामप्रकोष्ठः, हेम्नः वेत्रं हेमवेत्रम् वामप्रकोष्ठे अर्पितं हेमवेत्रं येन

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सः = दक्षिणेतरमणिबन्धधृतस्वर्णदण्डः, नन्दी = नन्दिकः (शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः' इत्यमरः)। मुखार्पितैकाङ्गुलिसंज्ञया–मुखे अर्पिता एका अङ्गुलिरिति मुखार्पितैकाङ्गुलिः, तस्याः संज्ञा तया=आननन्यस्तांगुलिसंकेतेन एव 'संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना' इत्यमरः)। गणान् = प्रमथादीन्। चापलाय = चञ्चलतायै। मा भवत=चपलतां मा कुरुत। इति = एवम्। व्यनैषीत्=कथितवान्।

सरलार्थः--अथ एवमविनयात्मकं भावं दृष्ट्वा नन्दिकेश्वरः प्रमथादिशिवगणान् मुखदत्तांगुलिसंकेतेन अकथयत् यद् यूयं चापल्यं विहाय धैर्यं धारयत।

हिन्दी--ऐसी मादक स्थिति को देखकर लता गृहद्वार पर नियुक्त दाहिने मणिबन्ध में स्वर्णदंड लिए हुए नन्दी ने मुँह पर एक अंगुलि रखकर संकेत से सावधान (चंचल न होने) रहने के लिए कहा ॥ ४१ ॥

निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम्।
तच्छासनात्काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥ ४२ ॥

अन्वयः—निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारं सर्वम् एव काननं तच्छासनात् चित्रार्पितारम्भ इव अवतस्थे।

व्याख्या—निष्कम्पेति। निष्कम्पवृक्षं--निर्गतः कम्पः येभ्यस्ते वृक्षा यस्मिंस्तत्=कम्पनरहितपादपम्। निभृतद्विरेफं=निर्भृता द्विरेफाः यस्मिंस्तत्=निश्चलचञ्चरीकम्। मूकाण्डजं--मूकाः = निःशब्दाः अण्डजाः = पक्षिसरीसृपादयः यस्मिंस्तत्। शान्तमृगप्रचारं–मृगाणां प्रचारः मृगप्रचारः, शान्तः मृगप्रचारः यस्मिंस्तत् = शान्तपशुचरणम्। सर्वम् = सम्पूर्णम् एव। काननम् = अरण्यम् ('अटव्यरण्यं विपिनं गहनं काननं वनम्'। इत्यमरः)। तच्छासनात् = तस्य=नन्दिकेश्वरस्य शासनात् = आदेशात्। चित्रार्पितारम्भ इव=चित्रे अर्पितः चित्रार्पितः, स आरम्भः यस्मिंस्तत् तथा = चित्रलिखितः यथा। अवतस्थे = तिष्ठतवान्। अत्रोत्प्रेक्षालङ्कारः।

सरलार्थः--निश्चलपादपं निष्कम्पचञ्चरीकं मौनपक्षिसरीसृपादिकं स्थिरपशुभ्रमणं सम्पूर्णमेव वनं तच्छासनात् चित्रलिखितं यथाऽतिष्ठत्।

Sri Vidyabharathi Book Centre, Srirgeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—निष्कम्प वृक्ष, निश्चल भ्रमर, मौन पक्षिसर्पादिक तथा स्थिर पशुभ्रमण वाला सम्पूर्ण वन ही नन्दिकेश्वर की आज्ञा से चित्रलिखित सरिस्थर हो गया ॥ ४२ ॥

दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥ ४३ ॥

अन्वयः—कामः प्रयाणे पुरः शुक्रम् इव तस्य दृष्टिप्रपातं परिहृत्य प्रान्तेषु संसक्तनमेरुशाखं भूतपतेः ध्यानास्पदं विवेश ।

व्याख्या—दृष्टिप्रपातमिति । कामः = मदनः ('मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः' इत्यमरः) । प्रयाणे = प्रस्थाने । पुरःशुक्रम् = समक्षभार्गवं (देशम्) इव = यथा ('शुक्रो दैत्यगुरुः काव्यः उशना भार्गवः कविः' इत्यमरः) । तस्य = नन्दिनः । दृष्टिप्रपातम् = अवलोकनम् । परिहृत्य = त्यक्त्वा । प्रान्तेषु = पार्श्वभागेषु । संसक्तनमेरुशाखं—नमेरूणां शाखाः नमेरुशाखाः, संसक्ताः नमेरुशाखाः यस्य तत् संसक्तनमेरुशाखम् = संलग्नानागकेसरशाखम् । भूतपतेः = भूतनाथस्य शिवस्य । ध्यानास्पदं = समाधिस्थानं । विवेश = प्रविवेश ।

सरलार्थः— यात्रायां शुक्रसमक्षतासदृशं नन्दिकेश्वरावलोकं परित्यज्य कामदेवः पुन्नागकेसरवृक्षसंलग्नं भूतनाथस्य शिवस्यावधानस्थलं प्रविवेश ।

हिन्दी —कामदेव यात्रा में शुक्र के सम्मुख होने के समान नन्दिकेश्वर को देखना छोड़कर नागकेसर के वृक्षों की घनी झाड़ियों से संलग्न भगवान् शिव के समाधि-स्थान में प्रविष्ट हुआ ॥ ४३ ॥

टिप्पणी—यात्राकाल में शुक्र के सम्मुख दिशा में यात्रा करना निषिद्ध है—

आग्नेयाद्यास्तरकाः, साभिजित्काः प्रागाद्याशासंस्थिता सप्त सप्त ।
यस्यां तिष्ठेद् भार्गवो दिशि अमुष्यां यात्रा पुंसां प्राणमानार्थहन्त्री ॥
मूहूर्त्तशास्त्रम् ।

अथ शिवदर्शनमाह—

स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श ॥ ४४ ॥

अन्वयः—आसन्नशरीरपातः सः शार्दूलचर्मव्यवधानवत्यां देवदारुद्रुमवेदिकायाम् आसीनं संयमिनं त्रियम्बकं ददर्श ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—स इति। आसन्नशरीरपातः—पतनं पातः, शरीरस्य पातः शरीरपातः, आसन्नः शरीरपातो यस्य सः आसन्नशरीरपातः=सन्निकटमृत्युः, सः=मदनः। शार्दूलचर्मव्यवधानवत्याम्—शार्दूलस्य चर्म शार्दूलचर्म, व्यवधानमस्त्यस्या इति व्यवधानवती, शार्दूलचर्मणा व्यवधानवती इति तस्याम् = मृगेन्द्रचर्मव्यवायसंयुक्ताम् ('शार्दूलद्विपिनौ व्याघ्रे' इति अमरः)। ('अजिनं चर्म कृत्तिः स्त्री' इत्यमरः)। देवदारुद्रुमवेदिकायाम्—देवदारो द्रुमः देवदारुद्रुमः तस्य या वेदिका तस्यां=देवदारुपादपवेद्याम्('शक्रपादपः पारिभद्रकः। भद्रदारुद्रुकिलियं पीतदारु च दारु च। पूतिकाष्ठ च सप्तस्युर्देवदारुणि' इत्यमरः) ('वेदिः परिस्कृता भूमिः' इत्यमरः)। आसीनम्=उपविष्टम्। संयमिनं=संयमोऽस्तीति संयमी, तम्=समाधिवन्तम्। त्रियम्बकं=त्रीणि अम्बकानि यस्य सः, तम्=त्रिनेत्रं शिवम्। ददर्श=अपश्यत्।

सरलार्थः—मरणासन्नः कामः व्याघ्रचर्मास्तीर्णायां देवदारुपादपमूले वेदिकायां समाधिनिष्ठं भगवन्तं महादेवमपश्यत्।

हिन्दी—सन्निकट मृत्युवाले उस मदन ने देवदारु वृक्ष के नीचे बनी वेदी (चबूतरे) पर व्याघ्रचर्म को बिछाकर समाधि लगाकर बैठे हुए भगवान् शिव को देखा॥ ४४॥

टिप्पणी—त्रियम्बकम्—यह शब्द महाकवि ने वैदिक वृत्त का अनुसरण कर प्रयुक्त किया है क्योंकि लौकिक संस्कृत में 'त्र्यम्बक' शब्द सिद्ध होता है।

पर्य्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं सन्नमितोभयांसम्।
उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीवमिवाङ्कमध्ये॥ ४५॥

अन्वयः—पर्यङ्कबन्धस्थिरपूर्वकायम् ऋज्वायतं सन्नमितोभयांसम् उत्तानपाणिद्वयसन्निवेशात् अङ्कमध्ये प्रफुल्लराजीवम् इव स्थितं (ददर्श)।

व्याख्या—पर्यङ्केति। पर्यङ्कबन्धस्थिरपूर्वकायम्—पर्यङ्कस्य बन्धः पर्यङ्कबन्धः, पूर्वकायस्येति पूर्वकायः, स्थिरः पूर्वकायः यस्य सः स्थिरपूर्वकायः, पर्यङ्कबन्धेन स्थिरपूर्वकायस्तम् = वीरासनबन्धस्थिरोर्ध्वशरीरम्। ऋज्वायतं—ऋजुश्चासौ आयतः ऋज्वायतस्तम्=दीर्घमायतम्। सन्नमितोभयांसम्—सन्नमितौ = अवनमितौ उभौ=द्वौ अंसौ=स्कन्धौ यस्य सः, तम्। उत्तानपाणिद्वयसन्निवेशात्—द्वौ अवयवौ यस्य तद् द्वयम्, पाण्योः द्वयमिति पाणिद्वयम्, पाणिद्वयस्य सन्निवेशः पाणिद्वयसन्निवेशः, उत्तानश्चासौ पाणिद्वय-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सन्निवेश इति सः, तस्मात् ऊर्ध्वतलकरद्वयनिवेशात्। अङ्कमध्ये=क्रोडान्तराले ('उत्सङ्गचिह्नयोरङ्कः' इत्यमरः)। प्रफुल्लराजीवम् इव—प्रफुल्लं=विकचितं राजीवं=कमलं यस्य सः, तम् इव=यथा ('प्रफुल्लोत्फुल्लसम्फुल्लव्याकोशविकचस्फटाः। फुल्लश्चैते' इत्यमरः)। स्थितं=तिष्ठन्तम्। तम्=शिवम्। ददर्श=अपश्यत्।

सरलार्थः—वीरासनेन स्थिरपूर्वार्द्धशरीरं दीर्घायतमवनमितस्कन्धदेशमूर्ध्वतलकरद्वयनिवेशात् क्रोडमध्ये प्रफुल्लकमलमिव स्थितं महादेवमपश्यत्।

हिन्दी—वीरासन से निश्चल शरीर के पूर्वार्द्ध को सीधा तथा सुस्थिर कर दोनों कन्धों को झुकाये गोद में कमल के समान दोनों हाथों को ऊपर उठाकर बैठे हुए भगवान् शिव को देखा॥ ४५॥

टिप्पणी—वीरासन—एकं पादमधैकस्मिन्वित्यस्योरौतु संस्थितम्।
इतरस्मिंस्तथैवोरुं वीरासनमुदाहृतम्।

भुजङ्गमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रम्।
कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमतीं दधानम्॥ ४६॥

अन्वयः—भुजङ्गमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रं कण्ठप्रभासंगविशेषनीलां ग्रन्थिमतीं कृष्णत्वचम् दधानं (तं ददर्श इति पूर्वेणान्वयः)।

व्याख्या—भुजङ्गमेति। भुजङ्गमोन्नद्धजटाकलापं—भुजङ्गमेन उन्नद्धः जटाकलापः यस्य सः, तम्=नागोन्नद्धजटासमूहम्। ('सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः।' इत्यमरः)। कर्णावसक्तद्विगुणाक्षसूत्रम्—कर्णे=दक्षिणकर्णोपरि अवसिक्तं द्विगुणम् अक्षसूत्रं यस्य स, तम्=दक्षिणश्रोत्रनिक्षिप्तावृत्तजपमालम् ('व्रतिनस्तु जटासटा' इत्यमरः)। ('कलापो भूषणे बर्हे तूणीरे संहतावपि')। कण्ठप्रभासंगविशेषनीलां—कण्ठस्य प्रभा कण्ठप्रभा, तस्याः सङ्गः कण्ठप्रभासङ्गः, विशेषेण नीला विशेषनीला ताम्=कण्ठप्रभासङ्गेन=कण्ठकान्तिसाहचर्येण विशेषनीलवर्णाम् ('कृष्णे नीलाऽसितश्यामकालश्यामलमेचकः।' इत्यमरः)। ग्रन्थिमतीं=बन्धनयुक्ताम् कृष्णाजिनम्। दधानम्=बिभ्राणम् तं शिवं ददर्श।

सरलार्थः—सर्पैः जटाजूट-सन्नद्धं दक्षिणश्रवणोपरिद्विगुणितां रुद्राक्षमालां कृत्वा कण्ठकान्तिसाहचर्येण नीलवर्णां बन्धनयुक्ताम्। कृष्णत्वचं—कृष्णसारमृगचर्मविभ्राणं तं शिवं ददर्श।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—साँपों से जटाजूट बाँधे, दाहिने कान पर रुद्राक्षमाला को दोवर कर चढ़ाये कण्ठ के गरलविष की कान्ति के कारण नीलवर्ण वाली गाँठ बँधे कृष्णाजिन (काले मृग के चर्म) को धारण किये हुए उन शिवजी को (काम ने) देखा ॥ ४६ ॥

किञ्चित्प्रकाशस्तिमितोग्रतारैर्भूविक्रियायां विरतप्रसङ्गैः ।
नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ॥ ४७ ॥

अन्वयः—किञ्चित्प्रकाशस्तिमितोग्रतारैः भूविक्रियायां विरतप्रसङ्गैः अविस्पन्दितपक्ष्ममालैः अधोमयूखैः नेत्रैः लक्ष्यीकृतघ्राणम् (तं ददर्श इति पूर्वेणान्वयः) ।

व्याख्या—किञ्चिदिति । किञ्चित्प्रकाशस्तिमितोग्रतारैः—किञ्चित् = स्तोकम् यथा तथा प्रकाशः = दीप्तिः यासां ताः स्तिमिताः = निश्चलाः उग्राः ताराः = उग्रकनीनिकाः येषां तानि किञ्चित्प्रकाशस्तिमितोग्रताराणि, तैः ('भयङ्करं प्रतिभयं रौद्र तूग्रमथी त्रिषु' इत्यमरः) । ('तारकाक्षकनीनिका' इत्यमरः) । भ्रूविक्रियायां—भ्रुवोः विक्रिया, तस्यां=भ्रूविक्षेपे । विरतप्रसङ्गैः—विरतः=निवृत्तः प्रसङ्गः = अवसरः यैस्तानि विरतप्रसङ्गानि, तैः । अविस्पन्दितपक्ष्ममालैः—पक्ष्मणां माला पक्ष्ममाला, अविस्पन्दिता पक्ष्ममाला येषां तानि अविस्पन्दितपक्ष्ममालानि, तैः = निश्चलपक्ष्मपंक्तिभिः । अधोमयूखैः = अवनतकिरणैः, नेत्रैः = नयनैः । लक्ष्यीकृतघ्राणम्—अलक्ष्यं लक्ष्यीकृतं यथा सम्पद्यते तथा कृतमिति लक्ष्यीकृतं घ्राणं येन स तम्=अवलोकितनासम् । ('क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका' इत्यमरः) । तं शिवं ददर्श ।

सरलार्थः—ईषत्प्रकाशनिश्चलकनीनिकैः स्थिरपक्ष्मपंक्तिभिरवनतनयनैः नासिकाग्रभागं पश्यन्तं शिवं ददर्श ।

हिन्दी—कुछ-कुछ प्रकाश से निश्चल बनी उग्र कनीनिकाओं वाली भ्रूविक्षेप को न करती हुई निर्निमेष नीचे की ओर किरणें फैलाने वाली आँखों से नासिका के अग्रभाग को देखते हुए समाधिस्थ भगवान् शिव को देखा ।

टिप्पणी—समाधि-वीरासन पर बैठकर चित्त को एकाग्र कर निर्निमेषनयनों से नासिका के अग्र भाग को देखते हुए ध्यानमग्न स्थिति को समाधि कहा जाता है—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एकं पादमथैकस्मिन्विन्यस्योरौ तु संस्थितम् । इतरस्मिंस्तथैवोरुं वीरासनमुदाहृतम् ॥ उत्तानिते करतले करमुत्तानितं परम् । आदायाङ्कगतं कृत्वा ध्यायेद्यस्तस्य सोऽन्तरम् ॥

अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम् ।
अन्तश्चराणां मरुता निरोधान्निवातनिष्कम्पमिव प्रदीपम् ॥ ४८ ॥

अन्वयः—अन्तश्चराणां मरुतां निरोधात् अवृष्टिसंरम्भम् अम्बुवाहम् इव अनुत्तरङ्गम् अपाम् आधारम् इव (स्थितम्) निवातनिष्कम्पं प्रदीपम् इव (तं ददर्श इति पूर्वेणान्वयः) ।

व्याख्या—अवृष्टीति । अन्तश्चराणाम्—अन्तः = अभ्यन्तरे चरन्तीति, तेषां = अभ्यन्तरचलताम् । मरुतां=पवनानाम् ('समीर मारुतमरुज्जगत्प्राणसमीरणाः' इत्यमरः) । निरोधात्=अवरोधात् । अवृष्टिसंरम्भम्—वृष्टेः संरम्भः वृष्टिसंरम्भः, अविद्यमानः वृष्टिसंरम्भः यस्य सः, तम् = अवर्षणसम्भ्रमम् । अम्बुवाहम्—अम्बु वहतीत्यम्बुवाहस्तम् = मेघम् ('अभ्र मेघो वारिवाहः पयोधरः प्रावृषेण्यः क्षत्रियित्नुर्बलाहकः' इत्यमरः) । इव = यथा स्थितम् । अनुत्तरङ्गम् = अनूर्मिम् । ('भङ्गस्तरङ्गः ऊर्मिर्वा स्त्रियां वीचिः' इत्यमरः) । अपाम्=वारिणाम् ('आपः स्त्री भूम्नि वा वारि सलिलं कमलं जलम्' इत्यमरः) । आधारम् इव=आशयमिव । निवातनिष्कम्पम्=निष्पवननिर्वेपथुः ('अथ वेपथुः कम्पः स्यात्' इत्यमरः) । प्रदीपम् इव=दीपकसदृशम् शिवं ददर्श । अत्रोपमालङ्कारः ।

सरलार्थः—देहाभ्यन्तरे प्रवहतां पवनानां नियमनात् अवर्षकनाम्भोदसदृशम् अङ्गं वारिणामाधारमिव, निष्पवननिर्वेपथु प्रदीपमिव शिवमपश्यत् ।

हिन्दी—शरीर के अन्दर विचरण करने वाले प्राणादि पवनों के निरोध से बिना वर्षा की सम्भावना वाले मेघ के समान, न उठने वाली तरङ्ग से युक्त जलाशय के समान, बिना हवा तथा कम्पन शून्य दीपक के समान समाधिस्थ शिवजी को कामदेव ने देखा ॥ ४८ ॥

कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः ।
मृणालसूत्राधिकसौकुमार्यां बालस्य लक्ष्मीं ललयन्तमिन्दोः ॥ ४९ ॥

अन्वयः—कपालनेत्रान्तरलब्धमार्गैः शिरस्तः उदितैः ज्योतिःप्ररोहैः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मृणालसूत्राधिकसौकुमार्यां बालस्य इन्दोः लक्ष्मीं ग्लपयन्तं (तं ददर्श इति पूर्वेणान्वयः)।

व्याख्या—कपालेति। कपालनेत्रान्तरलब्धमार्गैः—कपालस्य नेत्रं कपाल नेत्रं, तस्यान्तरेण ये लब्धमार्गास्तैः = कर्परनयनमध्यप्राप्तपथैः ('स्यात् कर्परः कपालोऽस्त्री' इत्यमरः)। शिरस्तः = शिरसः ('उत्तमाङ्गं शिरः शीर्ष मूर्धा नामस्तकोऽस्त्रियाम्' इत्यमरः)। उदितैः = उत्थितैः। ज्योतिःप्ररोहैः—ज्योतिषां = तेजसां प्ररोहाः = अंकुराणि, तैः = तेजोऽङ्कुरैः। मृणालसूत्राधिकसौकुमार्याम्—सुकुमारस्य भावः सौकुमार्यम्, मृणालसूत्रात् अधिकं सौकुमार्यं यस्याः सा, ताम् = बिसतन्त्वधिककोमलाम्। बालस्य इन्दोः = शिशुचन्द्रस्य, अर्द्धचन्द्रस्य वा ('हिमांशुश्चन्द्रमा चन्द्रः इन्दुः कुमुदबांधवः' इत्यमरः)। लक्ष्मीं = श्रियम्। ग्लपयन्तं = क्षीणतां प्रापयन्तम् महादेवं कामः अपश्यत्।

सरलार्थः—कपालनयनमध्यप्राप्तपथैः ब्रह्मरन्ध्रादुत्थितैस्तेजोऽङ्कुरैः बिसतन्तुविशेषकोमलामर्द्धचन्द्रश्रियं मलिनीकुर्वन्तं शिवं कामः ददर्श।

हिन्दी—नेत्र तथा ब्रह्मरन्ध से निकलने वाले तेजरूपी अंकुरों से मृणाल-तन्तु से भी अधिक सुकुमारता वाली अर्द्धचन्द्र की शोभा को मलिन करते हुए शिवजी को कामदेव ने देखा।

टिप्पणी—योगीजन प्राणायाम के द्वारा आग्नेयमण्डलनामक अग्नि कुण्डलिनीसंज्ञक अपने तेज को मूलाधार से उठाकर क्रमशः सुषुम्ना (नाड़ी) नाभि, हृदय तथा भौंहों में ले जाकर ब्रह्म में लीन करते हैं तथा तब ब्रह्म के उस तेज से तद्वर्त्ती अर्द्धचन्द्र की कान्ति भी क्षीण हो जाती है एवम् अर्द्ध चन्द्रमा में परमात्मा का साम्य प्रतीत होने लगता है॥ ४९॥

मनो नवद्वारनिरुद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम्॥ ॥५०॥

अन्वयः—नवद्वारनिषिद्धवृत्ति समाधिवश्यं मनः हृदि व्यवस्थाप्य क्षेत्रविदः यम् अक्षरं विदुः। तम् आत्मानम् आत्मनि अवलोकयन्तं (तं ददर्श इति पूर्वेणान्वयः)।

व्याख्या—मन इति। नवद्वारनिषिद्धवृत्ति—नवभ्यः द्वारेभ्यः निषिद्धा वृत्तिर्यस्य तत् = नयनश्रवणादिद्वारनिरुद्धव्यापारम्। समाधिवश्यम्—

Sri Vidyabharathi Book Gallery, Chennai

CC-O. In Public Domain. Digitized by eGangotri

वशं गतं वश्यं, समाधिना वश्य तत् समाधिवश्यं = प्रणिधानवश्यम् ('प्रणिधानं समाधिश्च समाश्रय' इति हलायुधः)। मनः=चेतः। हृदि=हृदये। व्यवस्थाप्य= निधाय। क्षेत्रविदः=क्षेत्रज्ञपुरुषाः। यम् अक्षरं--न क्षरतीत्यक्षरस्तम् = अविनाशनम्। विदुः=अजानन्। तम्=परमात्मानम्। आत्मनि=जीवे। अवलोकयन्तं=पश्यन्तम्। शिवमपश्यत्।

सरलार्थः—नयनश्रोत्रादिनवद्वारैः निवृत्तसञ्चारं समाधिवशं गतं मनः प्राणायामे हृदये प्रणिधाय क्षेत्रज्ञाः पुरुषाः यं परमात्मानमजानन्। तं परमात्मानमात्मनि पश्यन्तं शिवं कामो ददर्श।

हिन्दी—नयनादि नवद्वारों से संचार को रोके हुए समाधिवशवर्ती मन को हृदय में स्थापित कर क्षेत्रज्ञ पुरुष जिसे अविनाशी (परमात्मा) कहते हैं उस परमात्मा को आत्मा में ही दर्शन करते हुए भगवान् शिव को कामदेव ने देखा।

टिप्पणी—नवद्वार—२ नयन, २ श्रवण, २ नासिकारन्ध्र, १ मुख तथा २ मलमूत्र त्यागने के स्थान कुल शरीर में नौ द्वार होते हैं—नयनश्रवणे द्वे द्वे नासिके वदनं तथा। पायूपस्थौ च देहेऽस्मिन् नवद्वाराणि देहिनाम्॥

क्षेत्रज्ञ—शरीर का ज्ञाता (आत्मा) क्षेत्रज्ञ होता है—इदं शरीरं कौन्तेय! क्षेत्रमित्यभिधीयते। एतद्वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः॥ (गीता)।

पुरुष--क्षेत्रज्ञ, आत्मा अथवा पुरुष के दो भेद हैं क्षर तथा अक्षर। संसार के समस्त जीव नाशवान् होने के कारण क्षर कहलाते हैं और कभी नष्ट न होने वाला 'ब्रह्म' अक्षर कहलाता है।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ (गीता)॥ ५०॥

स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाऽप्यधृष्यम्।
नालक्षयत्साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात्॥ ५१॥

अन्वयः—स्मरः तथाभूतं मनसा अपि अधृष्यम् अयुग्मनेत्रम् अदूरात् पश्यन् साध्वससन्नहस्तः सन् स्वहस्तात् स्रस्तं शरं चापम् अपि न अलक्षयत्।

व्याख्या-स्मर इति। स्मरः=कामः। तथाभूतम् = तथाविधं समाधिनिष्ठम् मनसा=चेतसा अपि। अधृष्यम्-धर्षितुं शक्यः न धृष्यः अधृष्यस्तम् =

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धर्षितुमशक्यम् । अयुग्मनेत्रम्—न युग्मान्ययुग्मानि, अयुग्मानि नेत्राणि यस्य सः, तम्=त्रिनेत्रं शिवम् ('युग्मं तु युगलं युगम्' इत्यमरः)। अदूरात्=निकटात्। पश्यन्=अवलोकयन्। साध्वससन्नहस्तः—साध्वसेन=भयेन सन्नहस्तः=विश्लथकरः सन् ('भीतिर्भीः साध्वसं भयम्' इत्यमरः)। स्वहस्तात्—स्वस्य=आत्मनः हस्तात्=करात्। स्रस्तं=च्युतम्। शरं=सायकम्। चापम्=कार्मुकम् अपि न अलक्षयत्=नापश्यत्।

सरलार्थः—मनसाऽपि अनभिभवनीयं तथाविधं त्रिनेत्रं समीपात् अवलोकयन्नपि कामः भीत्या कम्पितहस्तः सन् स्वकरात् स्खलितं बाणं चापं चापि नाजानत्।

हिन्दी—कामदेव उपर्युक्त प्रकार से समाधिनिष्ठ, मन से भी जिनका अभिभव सम्भव नहीं है, ऐसे त्रिनेत्रधारी शिवजी को समीप से ही देखते हुए भी डर से काँपते हुए हाथों वाले अपने हाथ से धनुषबाण का छूटकर गिर जाना भी नहीं जान पाया ॥५१॥

निर्वाणभूयिष्ठमथास्य वीर्यं संधुक्षयन्तीव वपुर्गुणेन।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ।५२॥

अन्वयः—अथ निर्वाणभूयिष्ठम् अस्य वीर्यं वपुर्गुणेन संधुक्षयन्ती इव स्थिता वनदेवताभ्याम् अनुप्रयाता स्थावरराजकन्या अदृश्यत।

व्याख्या—निर्वाणेति। अथ=मदनधनुर्बाणपतनपश्चात्। निर्वाणभूयिष्ठम् भूयिष्ठेन निर्वाणं निर्वाणभूयिष्ठम् तत्=नष्टप्रायम्। अस्य=एतस्य मदनस्य। वीर्यं=पराक्रमम्। वपुर्गुणेन—वपुषः=शरीरस्य गुणः=वैशिष्ट्यम्, तेन वपुर्गुणेन=गात्रमनोरमतया। ('गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः)। संधुक्षयन्ती=विवर्द्धयन्ती, इव=यथा। स्थिता=वर्तमाना। वनदेवताभ्यां—वनस्य देवते, ताभ्याम्=विजयामालिनीसखीभ्याम्। अनुप्रयाता—अनु=पश्चात् प्रयाता=गच्छता। स्थावरराजकन्या—स्थावराणां राजा स्थावरराजा, तस्य कन्या=हिमालयदुहिता पार्वती। अदृश्यत=दृष्टिगता बभूव। अत्रोत्प्रेक्षालङ्कारः।

सरलार्थः—तदनन्तरं नष्टप्रायं मदनस्य बलं शरीरसौष्ठवेन वर्द्धयन्ती यथा विजयामालिनीसखीभ्यामनुगता पर्वतराजपुत्री पार्वती मदनेनावलोकिता।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—कामदेव के धनुर्बाण-पतन-पश्चात् नष्ट-प्राय इसके वीर्य को अपने शरीरसौष्ठव से मानो वृद्धि करती हुई विजया तथा मालिनी नामकी सखियों के साथ पार्वती को काम ने देखा ॥ २॥

अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती ॥ ५३ ॥

अन्वयः—अशोकनिर्भर्त्सितपद्मरागम् आकृष्टहेमद्युतिकर्णिकारम् मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती (स्थावरराजकन्या अदृश्यत इति पूर्वेणान्वयः)।

व्याख्या—अशोकेति । अशोकनिर्भर्त्सितपद्मरागम्—अशोकस्य=अशोकपुष्पस्य निर्भर्त्सितः पद्मरागः येन तत्=वञ्जुलतिरस्कृतलोहितकम् ('शोणरत्नं लोहितकः पद्मरागः' इत्यमरः)। आकृष्टहेमद्युतिकर्णिकारम्—हेम्नः द्युतिः हेमद्युतिः, आकृष्टा हेमद्युतिः यैस्तानि, आकृष्टहेमद्युतीनि कर्णिकाराणि यस्मिन्स्तत्=आहृतस्वर्णकान्तकर्णिकारं ('स्युः प्रभारुरुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः' इत्यमरः)। मुक्ताकलापीकृतसिन्धुवारम् मुक्तानां कलापाः मुक्ताकलापा तद्यथा सम्पद्यन्ते तथा कृतानि इति मुक्ताकलापकृतानि, सिन्धुवारस्य पुष्पाणि सिन्धुवारपुष्पाणि यस्मिंस्तत्=मौक्तिककलापीकृतनिर्गुण्डीपुष्पम् ('सिन्धुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणि केत्यपि' इत्यमरः)। वसन्तपुष्पाभरणं—वसन्तपुष्पाणि एव आभरणं तत्=सुरभिसुमनभूषणम् ('वसन्ते पुष्पसमयः सुरभिः' इत्यमरः)। वहन्ती=धारयन्ती स्थावरराजकन्याऽदृश्यत ।

सरलार्थः—अशोकसुमननिन्दितलोहितकमाहृतस्वर्णकान्तकर्णिकारं मौक्तिककलापीकृतनिर्गुण्डीपुष्प सुरभिसुमनविभूषणं धारयन्तीं पार्वतीं मदनः अपश्यत् ।

हिन्दी—अशोकपुष्प को निन्दित करनेवाले पद्मराग-सदृश अरुण, स्वर्ण द्युतिवाले कनेरपुष्प-सदृश पीत तथा मोतियों के सदृश शुभ्र सिन्धुवार पुष्पवाले सुरभि सुमनरूपी आभूषण धारण किये पार्वती को कामदेव ने देखा ॥ ५३ ॥

आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
पर्याप्तपुष्पस्तवकावनम्रा सञ्चारिणी पल्लविनी लतेव ॥ ५४ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—स्तनाभ्यां किञ्चिद् आवर्जिता इव तरुणार्करागं वासः वसाना, अतएव पर्याप्तपुष्पस्तबकावनम्रा पल्लविनी सञ्चारिणी लता इव उत्प्रेक्ष्यमाणा (पार्वती अदृश्यत इति पूर्वेणान्वयः) ।

व्याख्या—आवर्जितेति । स्तनाभ्याम्=पयोधराभ्याम् । किञ्चित्=स्तोकम् आवर्जिता इव=अवनमिता इव । तरुणार्करागं—तरुणश्चासौ अर्कः तरुणार्कः, तरुणार्कस्य रागः इव रागो यस्य तत्=नवसूर्यरागम् । वासः = वस्त्रम् ('वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम्' इत्यमरः) । वसाना=दधाना । अतएव पर्याप्तपुष्पस्तबकावनम्रा—पर्याप्तानि च तानि पुष्पाणि पर्याप्तपुष्पाणि, तेषां स्तबकाः पर्याप्तपुष्पस्तबकाः तैः अवनम्रा = प्रचुरपुष्पगुच्छावनता ('स्याद् गुच्छस्तु स्तबकः' इत्यमरः) । पल्लविनी—पल्लवाः सन्ति यस्याः सा पल्लविनी=किसलयवती । सञ्चारिणी सञ्चारः अस्ति यस्याः सा सञ्चारिणी = सञ्चारयुक्ता । लता इव=ततिरिव । उत्प्रेक्ष्यमाणा=अवलोक्यमाना पार्वती कामेन दृष्टा । अत्रोत्प्रेक्षालङ्कारः ।

सरलार्थः—स्तनभरेणावनता, प्रभातसूर्यप्रभेवारुणवस्त्रं दधाना प्रचुरपुष्पगुच्छावनम्रकिसलयवती जङ्गमा लतेव उत्प्रेक्ष्यमाणा पार्वती मदनेन दृष्टा ।

हिन्दी—स्तन भार के कारण थोड़ी अवनत, बालसूर्य के समान अरुण वस्त्र धारण किये अतः प्रचुर पुष्प-गुच्छो से झुकी किसलयों वाली लता-सदृश दिखलाई पड़ रही पार्वती को कामदेव ने देखा ।। ५४ ।।

स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य ।।५५।।

अन्वयः—स्थानविदा स्मरेण न्यासीकृतां कार्मुकस्य द्वितीयां मौर्वीम् इव (उत्प्रेक्ष्यमाणां) नितम्बात् स्रस्तां केसरदामकाञ्चीं पुनः पुनः अवलम्बमाना (पार्वती अदृश्यत इति पूर्वेणान्वयः) ।

व्याख्या—स्रस्तामिति । स्थानविदा—स्थानं वेत्तीति स्थानवित्, तेन=स्थानवेदिना । स्मरेण=मदनेन । न्यासीकृताम्—अन्यासो न्यासो यथा सम्पद्यते तथा कृता इति न्यासीकृता, ताम्=निक्षिप्ताम् । कार्मुकस्य=धनुषः ('धनुश्चापो धन्वशरासनकोदण्डकार्मुकाः इष्वासोऽपि' इत्यमरः) । द्वितीयाम्=अपराम् । मौर्वीम् इव-ज्यामिव ('मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः) । उत्प्रेक्ष्यमाणाम्—उत्=

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ऊर्ध्वं प्रेक्ष्यमाणाम् = अवलोक्यमानाम् । नितम्बात् = कटिपश्चाद् भागात् ('पश्चात् नितम्बः स्त्रीकट्याः' इत्यमरः) । स्रस्तां = स्खलिताम् । केसरदाम-काञ्चीम् = केसराणां दाम इति केसरदाम, तदेव काञ्ची, ताम् = बकुलसृङ्-मेखलाम् ('स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः) । पुनः पुनः = भूयोभूयः । अवलम्बमाना = हस्तेन धारयन्ती पार्वती दृष्टा । अत्रो-त्प्रेक्षालङ्कारः ।

सरलार्थः—निक्षेपस्थानवेदिना मदनेन धृतां धनुषः ऊपरां ज्यामिव ऊर्ध्व-मवलोक्यमानां कटिपश्चाद्भागात् पतितां बकुलमालामेखलां वारंवारं पश्यन्ती पार्वती दृष्टा ।

हिन्दी—निक्षेपयोग्य स्थान के जानकार मदन के खींची हुई धनुष की दूसरी डोरी के समान ऊपर दिखलाई पड़ने वाले नितम्बभाग से खिसकी हुई केसरमाला वाली करधनी को बारबार धारण करती हुई पार्वती को देखा ॥ ५५ ॥

सुगन्धिनिःश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं संभ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ॥ ५६ ॥

अन्वयः—सुगन्धिनिःश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफं प्रतिक्षणं सम्भ्रमलोलदृष्टिः लीलारविन्देन निवारयन्ती (पार्वती अदृश्यत इति पूर्वेणान्वयः) ।

व्याख्या—सुगन्धीति । सुगन्धिनिःश्वासविवृद्धतृष्णं—शोभनः गन्धो येषां ते सुगन्धिनः, सुगन्धिनश्च ते निःश्वासाः, तैः विवृद्धतृष्णः, तम् = अभीष्टगन्ध-मुखपवनदीर्घतृष्णम् । बिम्बाधराऽऽसन्नचरं – बिम्बमिवाधरः, बिम्बाधरः आसन्नं चरतीति आसन्नचरः, बिम्बाधरस्यासन्नचर इति, तम् = बिम्बोष्ठनिकट-वर्तिनम् ('ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः) । द्विरेफं = भ्रमरम् । प्रतिक्षण = क्षणं क्षणम् । सम्भ्रमलोलदृष्टिः—लोले दृष्टिर्यस्याः सा लोलदृष्टिः सम्भ्रमेण लोलदृष्टिः सम्भ्रमलोलदृष्टिः=साध्वसचपलनयना । लीलारविन्देन= लीलापद्मेन ('चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम्' इत्यमरः) । निवार-यन्ती=निषेधं कुर्वन्ती पार्वती दृष्टा । अत्र भाविकालङ्कारः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—सुरभितनिःश्वासदीर्घतृष्णं बिम्बोष्ठसन्निकटचरं भ्रमरं क्षणं क्षण लीलाकमलेन निषेधयन्ती पार्वती मदनेन दृष्टा ।

हिन्दी—सुगन्धित निःश्वास की बढ़ी हुई तृष्णा वाले बिम्बोष्ठ के निकट मड़राने वाले भौंरे को प्रतिक्षण सम्भ्रम के कारण चञ्चलदृष्टि वाली पार्वती को लीलाकमल से उड़ाते हुए मदन ने देखा ॥ ५६ ॥

तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्यसिद्धिं पुनराशशंसे ॥ ५७ ॥

अन्वयः—सर्वावयवानवद्यां रतेः अपि ह्रीपदम् आदधानां तां वीक्ष्य पुष्पचापः जितेन्द्रिये शूलिनि स्वकार्यसिद्धिं पुनः आशशंसे ।

व्याख्या—तामिति । सर्वावयवानवद्यां—सर्वैः अवयवैरनवद्या या सा, ताम् = सर्वाङ्गसुन्दरीम् । रतेः = कामपत्न्याः अपि । ह्रीपदम् = लज्जास्थानम् ('मन्दाक्षं ह्रीस्त्रपा लज्जा व्रीडा' इत्यमरः) । आदधानां = धारयन्तीम् । ताम् = पार्वतीम् । वीक्ष्य = अवलोक्य । पुष्पचापः = कुसुमायुधो मदनः । जितेन्द्रिये = जितानि वशीकृतानि इन्द्रियाणि येन स, तस्मिन् । शूलिनि = शूलधारिणि शिवे । स्वकार्यसिद्धिं = स्वाभीष्टकार्यसाफल्यम् । पुनः = भूयः । आशशंसे = अकामयत ।

सरलार्थः सर्वाङ्गसुन्दरीं कामपत्नीमपि तिरस्कुर्वतीं पार्वतीमवलोक्य कुसुमायुधः जितेन्द्रिये महादेवे आत्मकृत्यसफलतां पुनश्चकमे ।

हिन्दी—सर्वाङ्गसुन्दरी, रति के सौन्दर्य को भी तिरस्कृत करने वाली उन पार्वती को देखकर कुसुमायुध कामदेव को इन्द्रियजित् महादेव में अपने कार्य की सिद्धि का पुनः विश्वास हुआ ॥ ५७ ॥

भविष्यतः पत्युरुमा च शम्भोः समाससाद प्रतिहारभूमिम् ।
योगात्स चान्तःपरमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ॥ ५८ ॥

अन्वयः—उमा च भविष्यतः पत्युः शम्भोः प्रतिहारभूमिं समाससाद । स च अन्तःपरमात्मसंज्ञं परं ज्योतिः दृष्ट्वा योगात् उपारराम ।

व्याख्या—भविष्यत इति । उमा = पार्वती च ('उमा कात्यायनी गौरी हैमवतीश्वरी' इत्यमरः) । भविष्यतः = सम्भाविनः । पत्युः = स्वामिनः । शम्भोः = शिवस्य । प्रतिहारभूमिम्—प्रतिहारस्य भूमिः प्रतिहारभूमिस्तम् = द्वारदेशम्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

('स्त्रीद्वाद्वारिं प्रतिहार' इत्यमरः)। समाससाद=प्राप। सः=शम्भुश्च। अन्तः=हृदयस्थित=म्। परमात्मसंज्ञम् - परमश्चासौ आत्मा परमात्मा, सा संज्ञा यस्य तत्=परमात्माभिधानम् ('संज्ञा स्याच्चेतनानाम हस्ताद्यैश्चार्थसूचना' इत्यमरः)। परं=प्रमुखम्। ज्योतिः=प्रकाशम्, दृष्ट्वा=अवलोक्य। योगात्=समाधेः। उपारराम=विरराम। अत्र समुच्चयालङ्कारः।

सरलार्थः-पार्वती भाविनः भर्तुः शिवस्य द्वारदेशमगच्छत्। शिवश्च हृदि स्थितं परमात्माभिधानं प्रधानं दृष्ट्वा योगक्रियायाः (ध्यानाद्) विरराम।

हिन्दी—पार्वती जी भावी पति शिव जी के द्वार पर पहुँची। (उधर) हृदय में स्थित परमात्मा सज्ञक परम प्रकाश का साक्षात्कार कर योग (ध्यान क्रिया) से वह उठ खडे हुए॥ ५८॥

ततो भुजङ्गाधिपतेः फणाग्रैरधः कथञ्चिद्धृतभूमिभागः।
शनैःकृतप्राणविमुक्तिरीशः पर्यङ्कबन्धं निविडं बिभेद॥ ५९॥

अन्वयः— ततः भुजङ्गाधिपतेः फणाग्रैः अधः कथंचिद्धृतभूमिभागः शनैः-कृतप्राणविमुक्तिः ईशः निविडं पर्यङ्कबन्धं बिभेद।

व्याख्या—तत इति। ततः=तदनन्तरम्। भुजङ्गाधिपतेः = नागराजस्य शेषस्य ('सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः' इत्यमरः)। फणाग्रैः = फणाग्रभागैः। अधः=नीचैः। कथंचित्=केनापि प्रकारेण। धृतभूमिभागः—धृतः = स्थापितः भूमेः=पृथिव्याः भागः येन सः। शनैःकृतप्राणविमुक्तिः—प्राणानां विमुक्तिः प्राणविमुक्तिः, शनैः कृता प्राणविमुक्तिः येन सः=मन्दं कृतासुमुक्तिः। ईशः = शिवः ('शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः' इत्यमरः)। निविडं=सुदृढम्। पर्यङ्कबन्धं = वीरासनम्। बिभेद=शिथिलीचकार।

सरलार्थः योगादुपरते सति शम्भुः योगशास्त्रानुसारं प्राङ्निरुद्धं प्राणवायुं मन्दं सञ्चार्य भारं सोढुमसमर्थेन शेषेण सर्वाः फणाः तदधः एवाधाय काठिन्येन तद्भूप्रदेशधारणे सति स्ववीरासनमशिथिलयत्।

हिन्दी--योग (ध्यान) से विराम लेने पर शिवजी ने योगशास्त्र के अनुसार पूर्वनिरुद्ध प्राणवायु को धीरे-धीरे सञ्चारित कर भार को सहन करने में असमर्थ शेषनाग के द्वारा समस्त फण उसके नीचे धारण करके जैसे तैसे दृढ वीरासन को शिथिल किया॥ ५९॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथोमामहेश्वरयोः परस्परदर्शनोपायं वर्ण्यते—

तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम्।
प्रवेशयामास च भर्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ॥ ६० ॥

अन्वयः—अथ नन्दी तस्मै प्रणिपत्य शुश्रूषया उपेतां शैलसुतां शशंस। भर्तुः भ्रूक्षेपमात्रानुमतप्रवेशाम् एनाम् प्रवेशयामास च।

व्याख्या—तस्मै इति। अथ = अनन्तरम्। नन्दी = नन्दिकेश्वरः। प्रणिपत्य=शिवं प्रणम्य। शुश्रूषया=सेवया। उपेताम् = पार्श्वमागताम्। शैलसुताम्—शैलस्य=हिमालयस्य सुता=दुहिता, ताम्=पार्वतीम् ('अद्रिगोत्र-गिरिग्रावाऽचलशैलशिलोच्चयाः' इत्यमरः)। शशंस=प्रशंसयामास। भर्तुः= स्वामिनः शिवस्य। भ्रूक्षेपमात्रानुमतप्रवेशाम् = भ्रुवः क्षेपः भ्रूक्षेपः, भ्रूक्षेप-मात्रेणानुमतः प्रवेशः यस्याः सा, ताम् = भ्रूसंचालनमात्रप्रदत्तप्रवेशानुज्ञाम्। एनाम्=इमाम् पार्वतीम्। प्रवेशयामास=प्रवेशं चकार च।

सरलार्थः—समाधिभङ्गानन्तरं नन्दिकेश्वरः शिवं प्रणम्य सेवया पार्श्व-मागतां शैलदुहितरं पार्वतीं प्रशंसयामास। स्वामिनः शिवस्य भ्रूनिक्षेपमात्रानु-ज्ञातप्रवेशामिमां पार्वतीं च प्रविष्टांचकार।

हिन्दी—समाधि से विराम लेने के अनन्तर नन्दी ने शिवजी को प्रणाम कर शुश्रूषा के द्वारा समीप आई हुई शैलसुता पार्वती जी की प्रशंसा की तथा स्वामी के (शिवजी के) भौंह के संकेत मात्र से प्रवेश के लिए अनुमति पाई हुई पार्वती को आश्रम के अन्दर ले गया ॥ ६० ॥

तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य।
व्यकीर्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभंगभिन्नः ॥ ६१ ॥

अन्वयः—तस्याः सखीभ्यां स्वहस्तलूनः पल्लवभङ्गभिन्नः शिशिरात्य-यस्य पुष्पोच्चयः त्र्यम्बकपादमूले प्रणिपातपूर्वं व्यकीर्यत।

व्याख्या—तस्या इति। तस्याः = पार्वत्याः। सखीभ्यां = मालिनी-विजयाभिधानाभ्याम्। स्वहस्तलूनः—स्वहस्तेन=निजकरेण लूनः=कुटितः कर्तितो वा। पल्लवभङ्गभिन्नः—पल्लवानां भङ्गः पल्लवभङ्गः, पल्लवभङ्गस्त एव भिन्नः पल्लवभङ्गभिन्नः = किसलयखण्डमिश्रः। शिशिरात्ययस्य = शिशिरस्यात्ययः = शिशिरऋतोः नाशः यस्मिन् सः = वसन्तः, तस्य। पुष्पोच्चयः—पुष्पाणामुच्चयः पुष्पोच्चयः = कुसुमराशिः। त्र्यम्बकपादमूले—

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

पादयोः मूलं पादमूलं, त्र्यम्बकस्य पादमूलं तस्मिन् इति त्र्यम्बकपादमूले = शिवचरणमूले । व्यकीर्यत = विकीरिता ।

सरलार्थः—पार्वत्याः मालिनीविजयासंज्ञकाभ्यां सखिभ्यां निजहस्तावचितः किसलयशकलमिश्रः वसन्तस्य कुसुमराशिः शम्भोश्चरणमूले विकीरितोऽभूत् ।

हिन्दी—पार्वतीजी की मालिनी तथा विजया दोनों सहेलियों ने अपने हाथ से तोड़ी हुई किसलय-खण्ड-मिश्रित वसन्त की कुसुमराशि त्र्यम्बक शिवजी के चरणों में समर्पित की ॥ ६१ ॥

अथ पार्वत्याः प्रणतिमाह--

उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्ध्ना प्रणामं वृषभध्वजाय ॥ ६२ ॥

अन्वयः—उमा अपि नीलालकमध्यशोभि नवकर्णिकारं विस्रंसयन्ती कर्णच्युतपल्लवेन मूर्ध्ना वृषभध्वजाय प्रणामं चकार ।

व्याख्या—उमापीति । उमा=पार्वती अपि । नीलालकमध्यशोभि=नीलाश्च ते अलकाः नीलालकाः नीलालकानां मध्यं, तस्मिन् शोभते तच्छीलं नीलालकशोभि तत् = श्यामकुन्तलान्तरद्योति । नवकर्णिकारम् = नूतनकर्णिकारपुष्पम् ('कर्णिकारः परिव्याधः' इत्यमरः) । विस्रंसयन्ती = पातयन्ती । कर्णच्युतपल्लवेन = कर्णेभ्यः च्युताः पल्लवाः यस्य सः, तथाविधेन = श्रवणच्युतकिसलयेन । मूर्ध्ना = उत्तमाङ्गेन ('उत्तमाङ्ग शिरः शीर्षं मूर्धाना मस्तकोऽस्त्रियाम्' इत्यमरः) । वृषभध्वजाय = वृषभः ध्वजः यस्य सः, तस्मै = वृषचिह्नाय शिवाय ('गङ्गाधरोऽन्धकरिपुः ऋतुध्वंसी वृषध्वजः' इत्यमरः) । प्रणामं = प्रणतिम् । चकार = अकरोत् । अत्र परिकराऽलङ्कारः ।

सरलार्थः--पार्वत्यपि श्यामकुन्तलान्तद्युतिनूतनकर्णिकारपुष्पं निपातयन्ती कर्णस्खलितकिसलयेनोत्तमाङ्गेन वृषध्वजाय शिवाय प्रणनाम ।

हिन्दी--पार्वती जी ने भी श्यामल केश-कान्ति के गुँथे कर्णिकार (कनेर) के नूतन पुष्प को तथा कान पर रखे (चढ़ाये हुए) पल्लव को शिर से गिरा कर वृषभध्वज शिवजी को प्रणाम किया ॥ ६२ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ शिवस्याशीर्वादकथनं वर्ण्यते—

अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन ।
न हीश्वरव्याहृतयः कदाचित्पुष्णन्ति लोके विपरीतमर्थम् ॥ ६३ ॥

अन्वयः—सा भवेन अनन्यभाजं पतिम् आप्नुहि इति तथ्यम् एव अभिहिता । हि ईश्वरव्याहृतयः कदाचिद् अपि लोके विपरीतम् अर्थम् न पुष्णन्ति ।

व्याख्या—अनन्यभाजमिति । सा=कृतप्रणामा पार्वती । भवेन—भवतीति-भवस्तेन=शङ्करेण ('व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः' इत्यमरः) । अनन्यभाजम्—अन्यां न भजतीत्यनन्यभाक्, तम्=अन्यपत्नीरहितम् । पतिं=भर्त्तारम् । आप्नुहि=लभस्व । इति = एवम् । तथ्यम्=सत्यम् एव । अभिहिता=कथिता । हि = यतः । ईश्वरव्याहृतयः—ईश्वराणां = महापुरुषाणाम् व्याहृतयः=उक्तयः । कदाचिद् अपि = जातुचिदपि । लोके = संसारे ('लोकस्तु भुवने जने ।' इत्यमरः) । विपरीतम्=विरुद्धम् । अर्थम्=तात्पर्यम् । न पुष्णन्ति न = बोधयन्ति । अत्रार्थान्तरन्यासोऽलङ्कारः ।

सरलार्थः—शिवः पार्वतीमाह—त्वमनन्यभाजंभर्त्तारं लभस्वेति महापुरुषाणामुक्तयः भुवनेऽवितथाः भवन्ति ।

हिन्दी—शिवजी ने पार्वती से कहा कि तुम अन्य स्त्री को स्वीकार न करने वाला पति प्राप्त करो । महापुरुषों के कथन सदैव संसार में सत्य होते हैं ॥ ६३ ॥

कामस्तु बाणावसरं प्रतीक्ष्य पतङ्गवद्वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ॥ ६४ ॥

अन्वयः—कामः तु बाणावसरं प्रतीक्ष्य पतङ्गवत् वह्निमुखं विविक्षुः । उमासमक्षं हरबद्धलक्ष्यः सन् शरासनज्यां मुहुः आममर्श ।

व्याख्या—काम इति । कामः = कन्दर्पः ('कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ।' इत्यमरः) । तु । बाणावसरं—बाणस्यावसरः बाणावसरस्तं =शरप्रसङ्गम् । प्रतीक्ष्य=प्रतीक्षां कृत्वा । पतङ्गवत्=शलभसदृशम् । वह्निमुखं—वह्नेः = अग्नेर्मुखम् आननम्, तत् । विविक्षुः=प्रवेष्टुमिच्छुः । उमासमक्षम्—उमायाः = पार्वत्याः समक्षं = सम्मुखम् । हरबद्धलक्ष्यः—लक्षितुं योग्यं लक्ष्यम्,

Sri Vidyabharathi Book Center, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

बद्धं लक्ष्यं येन सः बद्धलक्ष्यः, हरस्य बद्धलक्ष्यः सः = शिवबद्धलक्ष्यः सन् । शरासनज्यां–शरासनस्य=धनुषः ज्यां = प्रत्यञ्चाम् । मुहुः = वारंवारम् । आमर्श = परामृष्टवान् ('मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः) ।

सरलार्थः—कामस्तु उमामहेश्वरयोः परस्परं परिचयकाल एव बाणप्रक्षेपणावसरं प्रतीक्ष्यमाणः सन् अग्निमुखं विविक्षुः शलभ-सदृशं मुहुर्मुहुः धनुर्ज्या परामृष्टवान् ।

हिन्दी—कामदेव ने तो बाण चलाने के अवसर की प्रतीक्षा कर फतिङ्ग के समान अग्निमुख में प्रवेश करने का इच्छुक बन पार्वती के समक्ष शिव जी को लक्ष्य बना कर धनुष की डोरी को बार-बार छुआ ।। ६४ ।।

अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ।। ६५ ।।

अन्वयः—अथ गौरी तपस्विने गिरिशाय ताम्ररुचा करेण भानुमतः मयूखैः विशोषितां मन्दाकिनीपुष्करबीजमालाम् उपनिन्ये ।

व्याख्या—अथेति । अथ=अनन्तरम् । गौरी = पार्वती । तपस्विने=तापसाय । गिरिशाय = शम्भवे । ('भूतेशः खण्डपरशुः गिरीशो गिरिशो मृडः' इत्यमरः) । ताम्ररुचा=ताम्र इव रुचिर्यस्य सः, तेन=ताम्रकान्तेन । करेण=हस्तेन ('स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः' इत्यमरः) । भानुमतः—सूर्यस्य । मयूखैः = किरणैः । विशोषितां—विशेषेण शोषिता विशोषिता, ताम्=शुष्कीकृताम् । मन्दाकिनी=स्वर्णदी ('मन्दाकिनीवियद्गंगा स्वर्णदीसुरदीधिका' इत्यमरः) । पुष्करबीजमालाम्—मन्दाकिन्याः पुष्कराणां बीजमाला, ताम्—गङ्गाकमलाक्षमालाम् । उपनिन्ये=अर्पितवती ।

सरलार्थः—प्रणामानन्तरं पार्वती निवृत्ततपसे शम्भवे स्वकरेण रविरश्मिमुष्कीकृतां गङ्गाकमलबीजाक्षमालां समर्पितवती ।

हिन्दी—प्रणाम करने के पश्चात् पार्वती ने तपश्चरण से निवृत्त हुए शिवजी के लिए अपने हाथ से सूर्य की किरणों द्वारा सुखाए गये गङ्गा के कमलगट्टों से बनी जपमाला समर्पित की ।।६५।।

प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च ।
सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ।। ६६ ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—त्रिलोचनः च प्रणयिप्रियत्वात् तां प्रतिग्रहीतुम् उपचक्रमे। पुष्पधन्वा च सम्मोहनं नाम अमोघं बाणं धनुषि समधत्त।

व्याख्या—प्रतिग्रहीतुमिति। त्रिलोचनः—त्रीणि लोचनानि यस्य सः, त्रिनेत्रः शिवः च ('लोचनं नयनं नेत्रम्' इत्यमरः)। प्रणयिप्रियत्वात्—प्रणयः अस्ति येषां ते प्रणयिनः, प्रणयिनां प्रियः प्रणयिप्रियस्तस्य भावस्तस्मात्=प्रणयिवल्लभत्वात् ('अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम्')। ताम्=पद्माक्षमालाम्। प्रतिग्रहीतुम्=स्वीकर्त्तुम्। उपचक्रमे=उपक्रमञ्चकार। पुष्पधन्वा=पुष्पाणां धनुर्यस्य सः पुष्पधन्वा=कुसुमायुधः कामः। च सम्मोहनं नाम=सम्मोहनाभिधानम्। अमोघम्—न मोघः अमोघस्तम्=अनिष्फलम्। बाणम्=शरम्। धनुषि=कार्मुके। समधत्त=अधारयत्। अत्र समुच्चयोऽलङ्कारः।

सरलार्थः—भक्तवत्सलतया शिवस्तां पद्माक्षमालां स्वीकर्त्तुमुपक्रमंचकार। कुसुमायुधश्च सम्मोहननामकमनिरर्थकं बाणं धनुषि संयोजयामास।

हिन्दी—भक्तवत्सलता से शिवजी ने उस पद्माक्षमाला को स्वीकार किया तथा पुष्पधन्वा कामदेव ने सम्मोहन नामक (अपना) अमोघबाण धनुष पर चढ़ाया।

टिप्पणी—द्रावण, क्षोभण, वशीकरण, आकर्षण तथा सम्मोहन यह काम के पाँच बाण माने गये हैं—

द्रावणः क्षोभणश्चैव वशीकरण इत्यपि।
आकर्षणश्च कामस्य बाणः सम्मोहनोऽपरः॥ ६६॥

हरस्तु किञ्चित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥ ६७॥

अन्वयः—हरः तु चन्द्रोदयारम्भे अम्बुराशिः इव किञ्चित्परिलुप्तधैर्यः सन् बिम्बफलाधरोष्ठे उमामुखे विलोचनानि व्यापारयामास।

व्याख्या—हर इति। हरः तु=महादेवस्तु। चन्द्रोदयारम्भे—चन्द्रस्योदयः चन्द्रोदयः, तस्यारम्भे=विधूदयकाले। अम्बुराशिः इव=समुद्रः इव। किञ्चित्परिलुप्तधैर्यः सन्—किञ्चित्=ईषत् परिलुप्तं=समाप्तं धैर्यं=धैर्यभावः यस्य यथाविधः सन्। बिम्बफलाधरोष्ठे—बिम्बफलम् इव अधरोष्ठः यस्य तत्, तस्मिन्=बिम्बफलसदृशाधरोष्ठे। उमामुखे—उमायाः मुखं, तस्मिन्=पार्वतीवदने ('वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः)। विलोचनानि=

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विशिष्टानि लोचनानि विलोचनानि, तानि=नयनानि । व्यापारयामास=प्रचालयामास । अत्र उपमालङ्कारः ।

सरलार्थः—चन्द्रोदयारम्भे यथा सागरः ईषद् धैर्यं परित्यजति (जलोद्वेलनं करोति) तथैव हरः किञ्चित्परिलुप्तधैर्यः सन् बिम्बफलसदृशाधरोष्ठे पार्वतीमुखे नयनानि प्रवर्तयामास ।

हिन्दी—चन्द्रोदय के आरम्भ में जिस प्रकार समुद्र अपनी स्थिरता की मर्यादा को छोड़कर कुछ-कुछ ज्वारभाटा (उमड़ाव) लेता है उसी प्रकार थोड़ा अधीर होते हुए शिवजी ने बिम्बाफल-सदृश अधरोष्ठोंवाली पार्वतीजी के मुख की ओर अपने नेत्र घुमाये ॥६७॥

विवृण्वती शैलसुताऽपि भावभङ्गैः स्फुरद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन ॥६८॥

अन्वयः—शैलसुता अपि स्फुरद्बालकदम्बकल्पैः भावभङ्गैः विवृण्वती चारुतरेण पर्यस्तविलोचनेन मुखेन साचीकृता तस्थौ ।

व्याख्या—विवृण्वतीति । शैलसुता—शैलस्य=हिमवतः पर्वतस्य सुता=दुहिता पार्वती । अपि स्फुरद्बालकदम्बकल्पैः—बालश्च ते कदम्बाः बालकदम्बाः, स्फुरन्तश्च ते बालकदम्बा इति स्फुरद्बालकदम्बाः, तत्कल्पैः=विकसितकोमलकदम्बसदृशैः ('नीपप्रियकदम्बास्तु हलिप्रियः' इत्यमरः) । भावभङ्गैः=भावभङ्गिमाभिः । विवृण्वती=प्रकाशयन्ती । चारुतरेण=अतिशयसुन्दरेण । ('सुन्दरं रुचिरं चारु सुषुमं साधु शोभनम्' इत्यमरः) । पर्यस्तविलोचनेन—पर्यस्ते विलोचने यस्मिंस्तत्, तेन=भ्रान्तनयनेन । मुखेन=आननेन । साचीकृता=वक्रीकृता ('तिर्यगर्थे साचि तिरः' इत्यमरः) । तस्थौ=अवतस्थे ।

सरलार्थः—पार्वत्यपि कदम्बपुष्पसदृशैः रोमाञ्चिताङ्गैः रत्याख्यभावं प्रकाशयन्ती अतिसुन्दरेण विभ्रान्तलोचनेनाननेन तिर्यक्कृताऽवतिष्ठत् ।

हिन्दी—पार्वती भी कदम्बपुष्प-सदृश रोमाञ्चयुक्त अङ्गों से रतिनामक भाव को प्रकट करती हुई अतिसुन्दर सलज्जनयन-मुख से तिरछी होकर खड़ी हो गई ।

टिप्पणी—अङ्गों के हावभाव निम्न प्रकार से साहित्यदर्पणकार कविराज ने बताये हैं—भ्रूनेत्रादिविकारैस्तु सम्भोगेच्छाप्रकाशकः ।
भाव एकात्मसंबन्धिकार्ये भाव उच्यते ॥६६॥

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद् बलवन्निगृह्य ।
हेतुं स्वचेतोविकृतेर्दिदृक्षुः दिशामुपान्तेषु ससर्ज दृष्टिम् ॥ ६९ ॥

अन्वयः—अथ अयुग्मनेत्रः वशित्वात् इन्द्रियक्षोभम् पुनः बलवत् निगृह्य स्वचेतोविकृतेः हेतुं दिदृक्षुः सन् दिशाम् उपान्तेषु दृष्टिं ससर्ज ।

व्याख्या—अथेति । अथ=अनन्तरम् । अयुग्मनेत्रः—अयुग्मानि नेत्राणि यस्य सः=त्रिनेत्रः शिवः ('युग्मं तु युगलं युगम्' इत्यमरः) । वशित्वात्=जितेन्द्रियत्वात् । इन्द्रियक्षोभम्—इन्द्रियाणां क्षोभः इन्द्रियक्षोभस्तम्=इन्द्रियविकारम् । पुनः=भूयः । बलवत्=सुदृढम् । निगृह्य=निग्रहं कृत्वा । स्वचेतोविकृतेः—स्वस्य=आत्मनः चेतसः=चित्तस्य विकृतिः=विकारः, तस्य ('चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' । इत्यमरः) । हेतुम्=कारणम् । दिदृक्षुः=दृष्टुमिच्छुः सन् दिशाम्=काष्ठाम् ('दिशस्तु ककुभः काष्ठाः आशाश्च हरितश्च ताः' । इत्यमरः) । उपान्तेषु=प्रान्तभागेषु । दृष्टिम्=नयनम् । ससर्ज=प्रसृजत्, अप्रसारयत् ।

सरलार्थः—अथ तदवस्थां प्राप्त्यनन्तरं महादेवो वशित्वात् स्वेन्द्रियविकारं पुनरपि सुष्ठु निवार्य आत्मनश्चेतोवृत्तिकारणं विज्ञातुं दिक्षु दृष्टिं प्रसारयामास ।

हिन्दी—ऐसी दशा में पहुँच जाने के पश्चात् भगवान् शिव ने इन्द्रियजित् होने के कारण अपनी इन्द्रियों के विकार को फिर से भली प्रकार निवारण कर अपनी मनोवृत्ति के विकार के कारण को जानने के लिए चारों ओर दृष्टि डाली ॥ ६९ ॥

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ ७० ॥

अन्वयः—सः दक्षिणापांगनिविष्टमुष्टिं नतांसम् आकुञ्चितसव्यपादं चक्रीकृतचारुचापं प्रहर्तुम् अभ्युद्यतम् आत्मयोनिं ददर्श ।

व्याख्या—स इति । सः=असौ शिवः । दक्षिणापांगनिविष्टमुष्टिं—दक्षिणश्चासौ अपाङ्गः दक्षिणापाङ्गः, निविष्टा मुष्टिर्यस्य सः निविष्टमुष्टिः, दक्षिणापाङ्गे निविष्टमुष्टिरिति, तम्=दक्षिणनेत्रान्तरस्थितमुष्टिम् ('अपाङ्गौ नेत्रयोरन्तौ' इत्यमरः) । नतांसं—नतौ=अवनम्रौ अंसौ=स्कन्धौ यस्य सः तम्=

CC-O. In Public Domain. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

अवनतस्कन्धम् । आकुञ्चितसव्यपादम्—आकुञ्चितः सव्यपादो यस्य सः, तम्=आकुञ्चितवामचरणम् । चक्रीकृतचारुचापम्—न चक्रमचक्रं, अचक्रं चक्रं यथा चक्रीकृतम्=मण्डलीकृतम् चारु=सुन्दरं चापं=धनुर्येन सः, तम् । प्रहर्त्तुं=प्रहारं कर्त्तुम् अभ्युद्यतम्=सन्नद्धम् । आत्मयोनिम्—आत्मा=मनः योनिः=उत्पत्तिहेतुः यस्य सः, तम्=मनोभवम् । ददर्श=अपश्यत् ।

सरलार्थः—महेश्वरः दक्षिणनेत्रान्तस्थितमुष्टिं नम्रस्कन्धमाकुञ्चितवामचरणं मण्डलीकृतसुधन्वानं प्रहर्त्तुं सन्नद्धं मनोभवमपश्यत् ।

हिन्दी—भगवान् शिव ने दाहिनी आँख के छोर तक मुट्ठी ताने, कंधे झुकाये, बाँये पैर को समेटे तथा सुन्दर धनुष तानकर प्रहार करने के लिए सन्नद्ध आत्मयोनि काम को देखा ॥ ७० ॥

तपःपरामर्शविवृद्धमन्योः भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चिः सहसा तृतीयादक्षणः कृशानुः किल निष्पपात ॥७१॥

अन्वयः—तपःपरामर्शविवृद्धमन्योः भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य तृतीयात् अक्षणः स्फुरन् उदर्चिः कृशानुः सहसा निष्पपात किल ।

व्याख्या—तप इति । तपःपरामर्शविवृद्धमन्योः—तपसः परामर्शः तपःपरामर्शः, तेन विवृद्धमन्युः यस्य सः, तस्य=तपश्चरणास्कन्दनवृद्धकोपस्य ('कोपक्रोधामर्षरोषप्रतिघारुट् क्रुधौ स्त्रियौ' इत्यमरः) । भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य—भ्रुवोः भङ्गः भ्रूभङ्गः, दुःखेन प्रेक्षितुं शक्यं दुष्प्रेक्ष्यम्, भ्रूभङ्गेन दुष्प्रेक्ष्यं मुखं यस्य सः, तस्य=भ्रूकौटिल्यदुर्दर्शनास्यस्य । तस्य=शिवस्य । तृतीयात् अक्षणः=तृतीयनेत्रात् । स्फुरन् = प्रकाशमानः । उदर्चिः—उत् ऊर्ध्वम् अर्चिः=ज्वाला यस्य सः ('ज्वालाभासोर्नपुंस्यर्चिः' इत्यमरः) । कृशानुः=वह्निः ('आश्रयाणो बृहद्भानुः कृशानुः पावकोऽनलः' इत्यमरः) । सहसा=अकस्मात् । निष्पपात=निश्चक्राम किल=खलु ।

सरलार्थः—तपसि कृताघातेनातिक्रुद्धस्य भ्रकुटिकुटिलदुर्दर्शनमुखस्य शिवस्य तृतीयनेत्रात् प्रकाशमानः ऊर्ध्वशिखो वह्निरकस्मात् निश्चक्राम ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—तपश्चरण पर किये आघात से अतिक्रुद्ध भ्रकुटि-कौटिल्य के कारण दुष्प्रेक्ष्य मुख वाले शिवजी के तृतीय नेत्र से प्रकाशमान लौ (अग्नि-शिखा) युक्त अग्नि निकली ॥ ७१ ॥

क्रोधं प्रभो ! संहर संहरेति यावद् गिरः खे मरुतां चरन्ति ।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥ ७२ ॥

अन्वयः—प्रभो ! क्रोधं संहर, संहर इति मरुतां गिरः खे यावत् चरन्ति तावत् भवनेत्रजन्मा सः वह्निः मदनं भस्मावशेषं चकार ।

व्याख्या—क्रोधमिति । प्रभो=स्वामिन् ! क्रोधं=कोपम् ('कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधौ स्त्रियाम् ।' इत्यमरः) । संहर=निवर्तय । इति=इत्थम् । मरुतां=अमराणाम् ('मरुतौ पवनामरौ' इत्यमरः) । गिरः=वाण्यः ('ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।' इत्यमरः) । खे=आकाशे । यावत्=यावत्कालम् । चरन्ति=प्रवर्त्तन्ते । तावत् । भवनेत्रजन्मा—भवस्य=शिवस्य नेत्रं, तस्मात् जन्म=उत्पत्तिः यस्य सः=शिवनयनोत्पन्नः । सः=असौ वह्निः=अग्निः ('अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः' इत्यमरः) । मदनं=कामम् ('मदनो मन्मथो मारः प्रद्युम्नः मीनकेतनः । कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥' इत्यमरः) । भस्मावशेषः—भस्य एवावशेषः यस्य सः=भूतिशेषः ('भूतिर्भसितभस्मनी' इत्यमरः) । चकार=कृतवान् ।

सरलार्थः—'हे प्रभो ! कोपं निवारय, निवारय ।' एवं देवानां वाचः यावन्नभसि प्रवर्तन्ते तावत् शिवनेत्रजाताग्निः कामं भसितावशिष्टं कृतवान् ।

हिन्दी—'हे प्रभो ! क्रोध को रोकिये, रोकिये' इस प्रकार देवताओं की आवाज जैसे ही गगन में होती है कि तभी शिवजी के नेत्र से उत्पन्न हुई अग्नि ने कामदेव को जलाकर भस्म कर दिया ॥ ७२ ॥

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥ ७३ ॥

अन्वयः—तीव्राभिषङ्गप्रभवेण इन्द्रियाणां वृत्तिं संस्तम्भयता मोहेन रतिः मुहूर्त्तम् अज्ञातभर्तृव्यसना सती कृतोपकारा इव बभूव ।

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri
CC-O. Jagadguru Kripalu Parishat Collection. Digitized by eGangotri
CC-O. Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—तीव्रेति। तीव्राभिषंगप्रभवेण—तीव्रश्चासौ अभिषङ्गः तीव्राभिषङ्गः, तस्मात् प्रभवतीति तेन = उग्राभिभवसम्भवेन ('अभिभवस्त्वभिभवे सङ्गः आक्रोशनेऽपि च' इति वैजयन्ती)। इन्द्रियाणां=करणानाम्। वृत्तिं = प्रवृत्तिम्। संस्तम्भयता = प्रतिबध्नता। मोहेन = मूर्च्छया। रतिः = कामपत्नी। मुहूर्त्तं=क्षणम्। अज्ञातभर्तृव्यसना—न ज्ञातमज्ञातम्, अज्ञातं भर्तुः व्यसनं यस्याः सा = अविदितपतिनाशा सती ('धवः प्रियः पतिर्भर्त्ता' इत्यमरः)। ('व्यसनं विपदि भ्रंशे दोषे कामजकोपजे।' इत्यमरः)। कृतोपकारा इव—कृतः उपकारः यस्याः सा = सम्पादितोपकृतिः यथा। बभूव=अभूत्। अत्रोत्प्रेक्षालङ्कारः।

सरलार्थः—अतिदुःसहाभिभवजातमक्षिरादीन्द्रियाणामात्मव्यापारं नाशयित्री, मूर्च्छारूपप्रलयेन कामभार्या रतिः क्षणं पतिमरणाव्यसनमविज्ञाय सम्पादितोपकृतिर्यथाऽभवत्।

हिन्दी—अत्यन्त असह्य पराभव से होने वाली चक्षुरादि इन्द्रियों के अपने-अपने कार्यों को नष्ट करने वाली, मूर्च्छा रूपी प्रलय से कामपत्नी रति थोड़ी देर तक पतिमरण को न जानकर उपकृत की गई ॥ ७३ ॥

तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य।
स्त्रीसन्निकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ॥ ७४ ॥

अन्वयः—तपस्वी भूतपतिः तपसः विघ्नं तम् आशु वज्रः वनस्पतिम् इव अवभज्य स्त्रीसन्निकर्षं परिहर्तुम् इच्छन् सन् सभूतः अन्तर्दधे।

व्याख्या—तमिति। तपस्वी = तापसः। भूतपतिः—भूतानां पतिः = प्रमथनाथः शिवः। तपसः=तपश्चरणस्य। विघ्नम्=अन्तरायम् ('विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः)। तम्=मदनम्। आशु = द्रुतम्। वज्रः=पविः ('ह्रादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः' इत्यमरः)। वनस्पतिः इव=पादपो यथा। अवभज्य=नाशयित्वा। स्त्रीसन्निकर्षम्—स्त्रियाः सन्निकर्षः स्त्रीसन्निकर्षस्तम् = स्त्रीसन्निधानम्। परिहर्त्तुं = परित्यक्तुम्। इच्छन्= अभिलषन् सन्। सभूतः—भूतैः=गणैः सहितः। अन्तर्दधे=तिरोहितो बभूव।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—तपोनिष्ठः भूतभावनः शिवः तपसि विघ्नकारकं मदनं द्रुतं कुलिशं वृक्षमिव विनश्य योषित्सन्निधानं विहातुमभिलषन् सन् सगणस्तिरोदधे।

हिन्दी—तपस्वी भूतपति भगवान् शिव तपस्या मे विघ्न डालने वाले उस काम को शीघ्र वज्र (बिजली) जैसे वृक्ष को नष्ट कर देता है (उसी प्रकार) नष्ट कर स्त्रीसान्निध्य दूर करने की इच्छा करते हुए अपने गणों सहित अन्तर्ध्यान हो गये ॥ ७४ ॥

अथ पार्वत्याः शुश्रूषावृत्तान्तम्—

शैलात्मजाऽपि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथञ्चित् ॥ ७५ ॥

अन्वयः—शैलात्मजा अपि उच्छिरसः पितुः अभिलाषं ललितम् आत्मनः वपुः च व्यर्थं समर्थ्य सख्योः समक्षम् इति च अधिकजातलज्जा शून्या सती कथञ्चित् भवनाभिमुखी जगाम।

व्याख्या—शैलात्मजेति। शैलात्मजा—शैलस्य=हिमालयस्य आत्मजा=दुहिता, पार्वती अपि। उच्छिरसः—उन्नतं शिरः यस्य सः, उच्छिरः, तस्य=उन्नतमस्तकस्य। पितुः=जनकस्य ('तातस्तु जनकः पिता' इत्यमरः)। अभिलाषं=मनोवांछितम्। ललितम्=मनोरमम्। आत्मनः=स्वस्य। वपुः=गात्रम् च ('गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः)। व्यर्थम्=निरर्थकम्। समर्थ्य=विचार्य। सख्योः=आल्योः ('आलिः सखी वयस्या च' इत्यमरः)। समक्षम्=सम्मुखम्। इति=एवम् च। अधिकजातलज्जा—अधिकं यथा तथा जाता लज्जा यस्याः सा=अत्युत्पन्नव्रीडा ('मन्दाक्षं ह्री त्रपा व्रीडा लज्जा' इत्यमरः)। शून्या=शून्यहृदया सती। कथञ्चित्=येन केनापि प्रकारेण। भवनाभिमुखी—भवनस्याभिमुखी=गेहाभिमुखी ('निशान्तपस्त्यसदनं भवनागारमन्दिरम्' इत्यमरः)। जगाम=ययौ। अत्र वसन्ततिलकावृत्तम्। तद्यथा—'उक्ता वसन्ततिलका तभजा जगौ गः' इति।

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Siddhabhathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः--नगेशदुहिता पार्वती अपि मानिनः तातस्य हिमालस्य 'हरः वरोऽस्त्विति' स्वाभिलाषां स्वशरीरं ललितं व्यर्थं च विचार्य विजयामालिनी-सख्योः सम्मुखमिति च जातापमानेन हेतुना अतिलज्जिता अत एव शून्यहृदया सती कष्टेन गेहाभिमुखमयात् ।

हिन्दी--नगेशतनया पार्वती ने भी स्वाभिमानी पिता हिमालय के 'शिव ही पति हों' ऐसी उच्च अभिलाषा तथा अपने शरीर की लावण्यता को निष्फल सोचकर विजया तथा मालिनी सखियों के सामने उत्पन्न हुए अपमान के कारण अत्यन्त लज्जित होकर उदास मन से अत्यन्त दुःखी होकर (अपने पिता के) घर को प्रस्थान किया ॥७५॥

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् ।
सुरगज इव बिभ्रत्पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद् वेगदीर्घीकृताङ्गः ॥ ७६ ॥

अन्वयः—सपदि अद्रिः रुद्रसंरम्भभीत्या मुकुलिताक्षीम् अनुकम्प्यां दुहितरं दोर्भ्याम् आदाय दन्तलग्नां पद्मिनीं बिभ्रत् सुरगज इव वेगदीर्घीकृताङ्गः सन् प्रतिपथगतिः आसीत् ।

व्याख्या—सपदीति । सपदि=शीघ्रम् ('द्राङ् मङ्क्षु सपदि द्रुते' इत्यमरः) । अद्रिः=पर्वतो हिमालयः ('अद्रिगोत्रगिरिग्रावाऽचलशैलशिलोच्चयाः' इत्यमरः) । रुद्रसंरम्भभीत्या—रुद्रस्य संरम्भः रुद्रसंरम्भः, तस्माद् भीतिस्तया=भूतभावन-क्रोधभयेन ('संरम्भः सम्भ्रमे कोपे' इति विश्वः) । मुकुलिताक्षीम्—मुकुलिते अक्षिणी यस्याः सा ताम्=निमीलितनेत्राम् । अनुकम्प्याम्=दयायोग्याम् । दुहितरम्=तनयाम् । दोर्भ्याम्=बाहुभ्याम् ('भुजबाहू प्रवेष्टो दोः' इत्यमरः) । आदाय=गृहीत्वा । दन्तलग्नाम्—दन्तयोः लग्ना दन्तलग्ना, ताम्=दशनलग्नाम् ('रदना दशना दन्ता रदाः' इत्यमरः) । पद्मिनीं=कमलिनीम् । बिभ्रत्=धारयत् । सुरगज इव=ऐरावत इव । वेगदीर्घीकृताङ्गः—न दीर्घमदीर्घम् अदीर्घं दीर्घं यथा स्यात्तथाकृतं दीर्घीकृतम् अङ्गं यस्य सः, वेगेन दीर्घीकृताङ्गः सः=

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रयायत्तीकृतकायः सन् । प्रतिपथगतिः—पन्थानं प्रति गता प्रतिपथा, प्रतिपथा गतिर्यस्य स प्रतिपथगतिः=मार्गानुसारिगमनः । आसीत्=अभवत् । अत्रोत्प्रेक्षालङ्कारः । मालिनीवृत्तम् । तद्यथा–'ननमयययुतेयं मालिनी भोगिलोकै' इति ।

सरलार्थः–तत्क्षणं हिमालयः भगवतः शिवस्य कोपभिया निमीलितनयनां दयार्हां स्वतनयां पार्वतीं कराभ्यामादाय द्वाभ्यां रदनाभ्यां नलिनीमैरावतो यथा वेगेन आयतीकृतकायः सन् मार्गमनुसृत्य जगाम ।

हिन्दी—तत्काल हिमालय भगवान् शंकर के क्रोध के डर से आँखें बन्द किये दयायोग्य अपनी पुत्री पार्वती को दोनों हाथों से उठाकर दाँतो पर कमलिनी को लिए सुरगज ऐरावत के समान वेग से अपने शरीर को सीधा किए मार्ग का अनुसरण कर चल दिये ॥ ७६ ॥

इति महाकवि कालिदासकृतौ कुमारसंभवे महाकाव्ये मदनदहनो नाम तृतीयः सर्गः

●

Sri Vidyabharathi Book Centre, Sringeri

श्लोकानुक्रमणिका

CC-O. In Public Domain. Digitized by eGangotri

श्लोकाः	श्लोकाङ्काः
अ	
अथेन्द्रिय	६९
अथोपनिन्ये	६५
अथोरुदेशात्	११
अध्यापितस्यो	६
अनन्यमाजम्	६३
अमी हि वीर्यं	१५
अवष्टिसंरम्भ	४८
अवैमि ते	१३
अशोकनिर्भं	५३
असम्मतः	५
असूत सद्यः	२६
आज्ञापय	३
आवर्जिता	५४
आशंसता	१४
उ	
उमाऽपि नीला	६२
क	
कपालनेत्रान्त	४९
कयासि कामिन्	८
कामस्तु	६४
कामेकपत्नी	७
किञ्चित्प्रकाश	४७
कुबेरगुप्ताम्	२५
केनाऽभ्यसूया	४
क्रोधं प्रभो	७२
ग	
गोत्रान्तरेषु	३८
गुरोर्नियोगाच्च	१७
च	
चूताङ्कुरास्वाद	३२
त	
तरः परामर्षं	७१
ततो भुजङ्गा	५९
तद्गच्छ	१८
तपस्विनः	३४
तमाशु विघ्नम्	७४
तव प्रसादात्	१०
तस्मिन्मघोनः	१
तस्मिन्वने	२४
तस्मिन्सुरा	१९
तस्मै शशंस	६०
तस्मै हिमाद्रेः	१६
तस्याः सुखी	६१
तं वेशमारोपित	३५
तथेति शैषा	२२
तां वीक्ष्य	५७
तीव्राभिषङ्ग	७३
द	
ददौ रसात्पङ्कज	३७
दृष्टिप्रतापं	४३
न	
निर्वाणभूयिष्ठ	५२
निष्कम्पवृक्षम्	४२
प	
पर्य्यङ्कबन्ध	४५
पर्यासपुष्प	३९
प्रतिग्रहीतुम्	६६

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्लोकाः	श्लोकाङ्काः
प्रसीद विश्रा	९
ब	
बालेन्दुवक्राण्य	२९
भ	
भविष्यतः	५८
भुजङ्गमोन्नद्ध	४६
म	
मधु द्विरेफः	३६
मधुश्च ते	२१
मनोनवद्वार	५०
मृगाः	३१
ल	
लग्नद्विरेफाञ्जन	३०
लतागृह द्वारगत	४१
व	
वर्णप्रकर्षे	२८
विवुण्वती	६८
श	
शैलात्मजा	७५
श्रुताप्सरोगी	४०
स	
सदक्षिणापाङ्ग	७०
स वेवदारु	४४
सद्यः प्रवाल	२७
सपदि मुकुलि	७६
स माधवेन	२३
सर्वं सखे	१२
स वासवेना	२
सुगन्धि	५६
सुराः समभ्य	२०
स्तस्तां नित	५५
स्मरस्तथा	५१
ह	
हिमव्यपाया	३३
हरस्तु किञ्चित्परि	६७

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रघुवंशमहाकाव्यम्

'चन्द्रकला' संस्कृत-हिन्दी व्याख्या सहित

व्या०—आचार्य शेषराजशर्मा रेग्मी

आचार्य जी की 'चन्द्रकला' टीका की सरलता छात्रों का हृदयहार बनचुकी है। इसकी सावतरण संस्कृत व्याख्या में छात्रों की सुविधा के लिए समस्त पद का पूरा-पूरा समास व विग्रह दिया गया है तथा शब्द पर्याय भी एक-एक शब्द के दो-दो दिये गए हैं, जिससे छात्रों को स्वयं पर्याय बनाने का अभ्यास हो सकेगा। व्याख्या के साथ सर्वत्र भावार्थ, समास तथा कोश का भी यथा समुचित निर्देश किया गया है। इस संस्करण से छात्र, अध्यापक उभय का बड़ा ही लाभ होगा। उत्तर पीठिका शीघ्र, पूर्वपीठिका ८—००

नैषधीय-चरितम्

मल्लिनाथी 'जीवातु' टीका सहित-

सान्वय सटिप्पण 'चन्द्रिका' हिन्दी व्याख्या विभूषित

डॉ० देवर्षि सनाढ्य शास्त्री

इस संस्करण की विशेषता—इसकी हिन्दी व्याख्या से मल्लिनाथी-संस्कृत व्याख्या की भी सविमर्श व्याख्या इस तरह की गई है कि छात्रों को मूल श्लोक लगाने में प्रयास नहीं करना होगा। प्रत्येक तथा अनेकार्थक श्लोकों की अस्पष्टता के निवारण के लिए हिन्दी टीका के साथ-साथ सुविशद टिप्पणी के रूप में व्याख्यात्मक विवेचन द्वारा ग्रन्थाशय को सस्पष्ट कर दिया गया है स्थलविशेष पर अनेकार्थक श्लोकों की व्याख्या भी विविध रूप से की गई है। इसकी लग-भग १०० पृष्ठों की पर्यालोचनात्मक भूमिका, कथासार आदि परीक्षार्थी छात्रों के लिए अधिक उपयोगी हैं। संपूर्ण शीघ्र। प्रथम सर्ग ८—००

१-३ सर्ग १८-००, १-५ सर्ग २७ ००, १-९ सर्ग ४५-००, १-११ सर्ग पूर्वार्ध ५०—०

वेणीसंहार-नाटकम्

सटिप्पण 'कमलेश्वरी' संस्कृत-हिन्दी व्याख्या सहित

व्याख्या—डॉ० बालगोविन्द झा

भारत के विभिन्न विश्वविद्यालयों में संस्कृत पाठ्य-क्रम के अन्तर्गत यह नाटक निर्धारित है, अतः छात्रों की आवश्यकता को ध्यान में रखकर विद्वान लेखक ने अपने अध्यापनानुभव से संस्कृत-हिन्दी उभय व्याख्याओं के माध्यम से छात्रों को वेणीसंहार के अध्ययन का पूरा-पूरा लाभ प्राप्त हो सके, इसी लक्ष्य से टीका लिखी है। नाटक के अन्तर्गत संवादों व श्लोकों के व्याख्याक्रम में अन्वय, प्रतिशब्द, कोश, छन्द एवं अलंकार का निर्देश तथा विशद विवेचनात्मक टिप्पणी द्वारा गंभीर भावों को सर्वजनवेद्य बनाने की चेष्टा की गई है। भूमिक भाग में कवि एवं उनकी कृति से संबद्ध ऐतिहासिक विवेचन भी सविस्तार प्रस्तुत किया गया है, जो उपलब्ध [illegible] में देखने को नहीं मिलता २०—००

Sri Vidyabharathi Book Centre, Sringeri

प्राप्तिस्थानम्—कृष्णदास अकादमी, पो० बा० १११८, वाराणसी-१